म. ग्रं. सं. ठाणें
विषय काव्य
सं. क्र. ७१६८
१९०८

REFBK-0000457

शाक १९०८

दा. क्र ४५७

REFBK-0000457

# काव्यविनोदः

श्रीमद्भगवद्गीतापाठशालार्थम्

**मोह्मय्याम्**

निर्णयसागरे मुद्रापयित्वा

प्राकाश्यं प्रापितः

शके १८३०

श्रीगणेशायनमः

# काव्यविनोद

Stamp with handwritten number

## परस्मैपदी भूधातुना वर्तमानकाळना रूपो

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| भवति | भवतः | भवन्ति | प्रथमः |
| भवसि | भवथः | भवथ | मध्यमः |
| भवामि | भवावः | भवामः | उत्तमः |

## वाक्यो

| | | |
|---|---|---|
| सः भवति=ते थायछे | त्वं भवसि=तुं थायछे | अहं भवामि=हुं थाउं छुं |
| तौ भवतः=तेओ बे थायछे | युवां भवथः=तमे बे थाओछो | आवां भववः=अमे बे थईयेंछियें |
| ते भवन्ति=तेओ थायछे | यूयं भवथ=तमे थाओछो | वयं भवामः=अमे थईयें छियें |

## भ्वादि, दिवादि, तुदादि अने चुरादिगणो मांहेला केटलाक परस्मैपदी क्रियापदो.

| | | |
|---|---|---|
| भवति=ते थायछे | पश्यति=जुवेछे | पृच्छति=पुछेछे |
| रक्षति=रक्षण करेछे | पिबति=पीयेछे | इच्छति=इच्छेछे |
| पठति=भणेछे | जीवति=जीवेछे | स्पृशति=अडकेछे |
| वदति=बोलेछे | दीव्यति=खेलेछे | चोरयति=चोरेछे |
| गच्छति=जायछे | युध्यति=लढेछे | पूजयति=पूजेछे |
| जयति=जीतेछे | नश्यति=नाश पामेछे | दण्डयति=दंड करेछे |
| चलति=हालेछे | | |

| | | |
|---|---|---|
| धावति=दोडेछे | शुष्यति=सुकाई जायछे | पीडयति=पीडा करेछे |
| नमति=नमेछे | सिध्यति=सिद्ध थायछे | भक्षयति=खायछे |
| तिष्ठति=उभो रहेछे | मुह्यति=गांडो बनेछे | ताडयति=मारमारेछे |
| पतति=पडेछे | शाम्यति=शांत थायछे | वर्णयति=वर्णवेछे |
| वहति=वहेछे उंचकी लई जायछे | तुदति=दुःख आपेछे | भूषयति=शणगारेछे |

## पाठ २

### अकारान्त पुल्लिंगी अने नपुं-सकलिंगी नामोनी प्रथमा.

| | | |
|---|---|---|
| देवः=देव | मूर्खः=मूर्खो | ज्ञानम्=ज्ञान |
| पुत्रः=दीकरो | नृपः=राजा | फलम्=फल |
| शुकः=पोपट | वृक्षः=झाड | जलम्=पाणी |
| दासः=चाकर | शिष्यः=शिष्य | दुःखम्=दुःख |
| वीरः=शूर | वालः=छोकरो | धनम्=धन |
| भक्तः=भक्त | अश्वः=घोडो | मुखम्=मोढुं |

### वाक्यो

| | | |
|---|---|---|
| देवः रक्षति | वृक्षः चलति | ज्ञानं भवति |
| पुत्रः पठति | शिष्यः पृच्छति | फलं पतति |
| शुकः वदति | वीरः युध्यति | दुःखं तुदति |
| दासः गच्छति | वालः धावति | धनं नश्यति |
| मूर्खः दीव्यति | भक्तः नमति | जलं वहति |
| नृपः जयति | अश्वः तिष्ठति | मुखं शुष्यति |

# पाठ ३

## द्वितीया अने तृतीया

अलंकारः=घरेणुं
आचार्यः=गुरु
उद्यमः=उद्योग
करः=हाथ
जनः=लोक
जीवः=जीव
दण्डः=लाकडी
नरः=माणस

पादः=पग
वाणः=वाण, तीर
बुधः=डाह्योमाणस
भारः=बोजो
रथः=रथ
रोगः=रोग
श्लोकः=श्लोक
सूर्यः=सूरज

चक्रम्=पैडुं
धान्यम्=धान्य
नेत्रम्=आंख
पुण्यम्=पुण्य
पुष्पम्=फूल
शरीरम्=शरीर
सुखम्=सुख

## वाक्यो

रामः पुत्रं पृच्छति
दासः भारं वहति
भक्तः देवं पूजयति
बालः सूर्यं नमति
शिष्यः श्लोकं पठति
नृपः चोरं दण्डयति
जीवः अज्ञानेन मुह्यति
अज्ञानं ज्ञानेन नश्यति
उद्यमेन कार्यं सिद्ध्यति
अहं मुखेन वदामि
बुधाः सुखेन जीवन्ति
रामः चोरं दण्डेन ताडयति
नरः पुण्येन रामं पश्यति

पुरुषः सुखं इच्छति
रोगः शरीरं पीडयति
बालः जलं पिबति
चोरः धान्यं चोरयति
रामः पुष्पं पश्यति
पुत्रः फलं भक्षयति
रामः करेण मुखं स्पृशति
जनाः पादाभ्यां गच्छन्ति
रथः चक्राभ्यां चलति
वयं नेत्राभ्यां पश्यामः
शिष्यः श्लोकैः आचार्यं वर्णयति
पुत्रः अलंकारैः शरीरं भूषयति
रामः बाणैः रावणं जयति

# पाठ ४

## चतुर्थी अने पंचमी

अध्ययनम्=भणवुं
अजीर्णम्=अपचो
जीवितम्=जीवतर
दानम्=दान
नमः=नमस्कार(अव्यय)
पर्जन्यः=वरसाद
बन्धः=बन्ध
भोजनम्=जमवुं
मोक्षः=मोक्ष
युद्धम्=लडाई
वाचनम्=वाचवुं
व्यायामः=कसरत
शस्त्रम्=हथीयार
शास्त्रम्=शास्त्र
स्नानम्=न्हावुं

## वाक्यो

स्नानाय जलम्
भोजनाय पात्रम्
दानाय धनम्
वाचनाय पुस्तकम्
पुण्याय परोपकारः
ज्ञानात् मोक्षः
अज्ञानात् बन्धः
संतोषात् सुखम्
असंतोषात् दुःखम्
पर्जन्यात् अन्नम्
युद्धाय शस्त्रम्
ज्ञानाय शास्त्रम्
धर्माय जीवितं
केशवाय नमः
नारायणाय नमः
उद्यमात् धनम्
अध्ययनात् ज्ञानम्
व्यायामात् बलम्
दानात् पुण्यम्
अजीर्णात् रोगः

---

# पाठ ५

## षष्ठी–सप्तमी–संबोधनम्

अवसरः=वखत
आम्रः=आंबानुं झाड
कंकणम्=कंकण
कर्णः=कान
कज्ज्लम्=काजळ
कुण्डलम्=कुंडल
कूपः=कुवो
कुत्र=कयां (अव्यय)
किम्=शुं? (अव्यय)
नेत्रम्=आंख
भाग्यम्=दैव
मन्दिरम्=मंदीर
रणः=युद्ध
वनम्=जंगल
वासः=रहेठाण
सुवर्णम्=सोनुं
हस्तः=हाथ.

### वाक्यो

| | |
|---|---|
| देवस्य मन्दिरम् | सुवर्णस्य कंकणम् |
| आम्रस्य फलम् | कूपस्य जलम् |
| गौतमस्य आश्रमः | कृष्णस्य भक्तः |
| पुरुपस्य भाग्यम् | भोजनस्य अवसरः |
| वने वासः | कर्णे कुण्डलम् |
| रणे उत्साहः | नेत्रे कज्जलम् |
| कूपे जलम् | हे राम कुत्र गच्छसि ? |
| हस्ते पुस्तकम् | हे कृष्ण किं वदसि ? |

---

# पाठ ६

## आवन्त स्त्रीलिंगी शब्दोनी साते विभक्तिओ

### कोशः

| | | |
|---|---|---|
| आज्ञा=हुकम | तृष्णा=वधारे आशा | विद्या=विद्या |
| आशा=आशा | देवता=देवता | श्रद्धा=श्रद्धा |
| कन्या=दिकरी | पाठशाला=पाठशाला | सीता=सीताजी |
| कृपा=दया | पूजा=पूजा | आगमनम्=आववुं |
| क्रीडा=रमत | प्रजा=रैयत | कन्दुकः=दडो |
| गंगा=गंगा | रमा=लक्ष्मी | पूजनम्=पूजा |
| चिन्ता=चिंता, फीकर | लज्जा=शरम | |

### वाक्यो

| | |
|---|---|
| देवस्य कृपा भवति | देवतायै नमस्कारः |
| चोरस्य लज्जा नश्यति | आशायाः दुःखं भवति |
| नृपस्य कन्या गच्छति | चिन्तायाः रोगाः भवन्ति |
| देवता भक्तं रक्षति | कन्यायाः दानम् |
| जनः रमां इच्छति | प्रजायाः रक्षणम् |

| | |
|---|---|
| रामः सीतां पश्यति | देवतायाः पूजनम् |
| बालः पाठशालां गच्छति | गंगायां स्नानम् |
| नृपस्य आज्ञया गच्छामि | पाठशालायां आगमनम् |
| श्रद्धया देवं भजामि | देवतायां श्रद्धा |
| देवस्य कृपया जीवामि | हे कन्ये कुत्र गच्छसि |
| क्रीडायै कन्दुकः | हे तृष्णे त्वं किं न शाम्यसि |
| पूजायै पुष्पाणि | |

---

# पाठ ७

## परस्मैपदी अस् अने कृधातुना वर्तमानकाळनां रूपो तेमज आत्मनेपदी रम धातुना वर्तमानकाळनां रूपो

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अस्ति | स्तः | सन्ति | करोति | कुरुतः | कुर्वन्ति | रमते | रमेते | रमन्ते |
| असि | स्थः | स्थ | करोषि | कुरुथः | कुरुथ | रमसे | रमेथे | रमध्वे |
| अस्मि | स्वः | स्मः | करोमि | कुर्वः | कुर्मः | रमे | रमावहे | रमामहे |

## क्रियापदो

| | | |
|---|---|---|
| अस्ति=छे | मोदते=आनंद पामेछे | वर्धते=वधेछे |
| ईक्षते=जुवेछे | यतते=यत्न करेछे | शिक्षते=शीखेछे |
| कम्पते=कांपेछे | याचते=मांगेछे | शोभते=शोभेछे |
| करोति=करेछे | रमते=रमेछे | सहते=सहन करेछे |
| क्षमते=खमेछे | लभते=मेळवेछे | सेवते=सेवेछे |
| जायते=उत्पन्न थायछे | वन्दते=वन्देछे | |
| भाषते=बोलेछे | वर्तते=होयछे, वर्तेछे. | |

## कोशः

| | | |
|---|---|---|
| उद्यानम्=वाडी | सत्पुत्रः=सारो दीकरो | न=नहि |
| तातः=बाप | अत्र=अहीआं, (अ) | पुनः=फरि, |
| दीपः=दीवो | किमपि=कांई पण | सदा=हमेशा. |
| पर्वतः=पहाड | तत्र=त्यां | याचकः=मांगण. |

## वाक्यो

दीपः कुत्र अस्ति
त्वं ब्राह्मणः असि
अहं क्षत्रियः अस्मि
सः तत्र किं करोति
त्वं अत्र किं करोषि
अहं अत्र अध्ययनं करोमि
हे पुत्र तत्र किं ईक्षसे
वृक्षाः वातेन कम्पन्ते न पर्वताः
भक्तः देवं पुनः पुनः वन्दते
तत्र किं वर्तते
तत्र किमपि न वर्तते
मूर्खस्य शरीरं वर्धते न ज्ञानम्

आचार्यः अपराधं न क्षमते
ज्ञानात् मोक्षः जायते
हे पुत्र त्वं किं न भाषसे
जनाः धनस्य लाभेन मोदन्ते
आचार्याः शिष्याणां कल्याणाय यतन्ते
याचकः धनं याचते
बालाः उद्याने रमन्ते
पुरुषः उद्यमेन धनं लभते
रामः विश्वामित्रात् धनुर्वेदं शिक्षते
सत्पुत्रेण कुलं शोभते
सः सदा दुःखं सहते
शिष्यः आचार्यं सेवते

---

# पाठ ८

## विशेषणो अने युष्मदस्मत् शब्दो

### विशेषणो

| | | |
|---|---|---|
| दृष्टम्=जोएलुं | कुपितम्=घुस्से थयेलुं | सुन्दरम्=सुंदर |
| श्रुतम्=सांभळेलुं | संतुष्टम्=राजी थयेलुं | निर्मलम्=स्वच्छ |
| कृतम्=करेलुं | सरलम्=सीधुं | मधुरम्=मीठुं |
| कथितम्=कहेलुं | कुटिलम्=वांकुं | मलिनम्=मेलुं |
| गतम्=गयेलुं | शीतलम्=थंडुं | पवित्रम्=पवित्र |

### कोशः

| | | |
|---|---|---|
| छाया=छाया | वेला=वखत | संदेशः=संदेशो |
| जिव्हा=जीभ | वृत्तान्तः=खबर | समयः=वखत |
| नगरम्=नगर | सेवा=चाकरी | कुशलम्=खुशाली |

यल्लिंगं यद्वचनं याच विभक्तिर्विशेष्यस्य
तल्लिंगं तद्वचनं साच विभक्तिर्विशेषणस्यापि

## वाक्यो

| | |
|---|---|
| दृष्टं नगरम्, दृष्टा कन्या, दृष्टः देशः | अहं त्वां पृच्छामि |
| श्रुतं पुराणम्, श्रुता कथा, श्रुतः वृत्तान्तः | त्वं मां किं पृच्छसि |
| कृतं पापम्, कृता सेवा, कृतः उपकारः | पुत्रः त्वां नमति |
| कथितं वाक्यम्, कथिता कथा, कथितः संदेशः | आचार्यः मां कुशलं पृच्छति |
| गतं धनम्, गता वेला, गतः समयः | त्वया तत्र किं श्रुतम् |
| कुपितं चित्तम्, कुपिता देवता, कुपितः नृपः | मया तत्र किमपि न श्रुतम् |
| संतुष्टं चित्तम्, संतुष्टा देवता, संतुष्टः ब्राह्मणः | हे देव तुभ्यं नमः |
| सरलं भाषणम्, सरला भाषा, सरलः पुरुषः | मह्यं फलानि सन्ति किम् |
| कुटिलं मुखम्, कुटिला जिव्हा, कुटिलः पुरुषः | तव पुस्तकं कुत्र वर्तते |
| शीतलं जलं, शीतला छाया, शीतलः लेपः | मम पुस्तकं कुत्र वर्तते |
| सुन्दरं मुखम्, सुन्दरा भाषा, सुन्दरः पुत्रः | त्वयि मम विश्वासः |
| निर्मलं चित्तं, निर्मला गंगा, निर्मलः पुरुषः | मयि तव विश्वासः |
| मधुरं भाषणम्, मधुरा भाषा, मधुरः रसः | यूयं यूयं वयं वयम् |
| मलिनं वस्त्रम्, मलिना कन्या, मलिनः पदार्थः | युष्माकं पुत्राः |
| पवित्रं जलम्, पवित्रा कथा, पवित्रः पुरुषः | अस्माकं धनम् |

---

# पाठ ९

## तद् यद् किम् शब्दोना त्रणे लिंगो

| | |
|---|---|
| आगतः=आवेलो | पतितम्=पडेलुं |
| जीवितम्=जीवतर | वृथागतम्=फोगटगयुं |
| निष्णातः=प्रवीण | मुह्यति=मुंजवणमां पडेछे |

## वाक्यो

| | |
|---|---|
| सः पुरुषः गच्छति | तस्य पुरुषस्य चित्तं निर्मलम् |
| सः मूर्खः कुप्यति | तस्य वृक्षस्य फलं मधुरम् |
| सः ब्राह्मणः पठति | वृथा गतं तस्य नरस्य जीवितम् |

तत् फलं पतति
तत् गृहं शोभते
तत् कुलं वर्धते
तं देवं नमामि
तं ब्राह्मणं पृच्छामि
तं पुरुषं वन्दे
तं नृपं सेवे
अहं तत् गृहं पश्यामि
कन्या तत् पुस्तकं ईक्षते
तेन ब्राह्मणेन कथितं पुराणं
तेन मार्गेण गताः पुरुषाः
तेन कारणेन कुपितः आचार्यः
तेन भाषणेन संतुष्टा कन्या
तस्मै देवाय नमः
तस्मै ब्राह्मणाय नमः
तस्मात् वृक्षात् पतितं फलम्
तस्मात् ग्रामात् आगतः पुरुषः
तस्मात् पुरुषात् श्रुतं वाक्यं

सः तस्मिन् ग्रामे वसति
सः तस्मिन् विषये निष्णातः
तस्मिन् देशे पण्डिताः सन्ति
तस्मिन् शास्त्रे पण्डिताः अपि मुह्यन्ति
सा कन्या रमते
सा विद्या शोभते
सा पाठशाला वर्धते
अहं तां कन्यां पश्यामि
सः तां विद्यां शिक्षते
सः तां देवतां भजते
तया कन्यया किं कृतम्
तया श्रद्धया देवः तुष्यति
तस्यै देवतायै नमः
तस्याः पाठशालायाः आगतः
तस्याः कन्यायाः पुस्तकम्
तस्याः विद्यायाः अभ्यासः
तस्यां देवतायां मम विश्वासः
त्वं तस्यां कलायां निष्णातः

---

# पाठ १०

## इदम् एतत् अदस् शब्दोना त्रणे लिंगो

### कोशः

| | | |
|---|---|---|
| अतीव=घणुंज (अ) | दर्शनम्=दर्शन | पाकः=रसोई |
| कर्तव्यम्=कर्तव्यकर्म | कृतार्थः=कृतकृत्य | श्रेष्ठा=श्रेष्ठ |
| विश्वं=जग | समीचीना=सारी | लता=वेल |
| अरण्यम्=जंगल | रमणीया=रळीयामणी | कुसुमम्=फूल |
| वन्द्यः=वंदवायोग्य | कल्पना=युक्ती | मन्यते=मानेछे |

## वाक्यो

अयं मम पुत्रः
अयं तव दोषः
अयं तस्य गुणः
इदं तव पुस्तकम्
इदं मम गृहम्
इदं अस्माकं कर्तव्यम्
इमं पुरुषं अहं पश्यामि
इमं दोषं कः पश्यति
अहं इदं विश्वं अरण्यं मन्ये
अहं इदं सुखं दुःखं मन्ये
अनेन सदाचारेण त्वं वन्द्यः
अनेन दुराचारेण त्वं निंद्यः
अस्मै देवाय नमः
अस्मात् ब्राह्मणात् मया भागवतंश्रुतम्
अस्य पुरुषस्य दर्शनेन अहं कृतार्थः
अस्मिन् ग्रामे कः पण्डितः
इयं पाठशाला अतीव समीचीना
इयं कल्पना अतीव रमणीया
इयं कन्या कस्य ?
इमां कन्यां पृच्छामि
इमां देवतां नमामि
अनयाकन्ययाकृतःपाकःअतीवसुन्दरः
अनया देवतया दत्तः वरः
अस्यै देवतायै नमः
अस्याः कल्पनायाः सा कल्पना श्रेष्ठा
अस्याः कन्यायाः रूपं मधुरम्
अस्यां पाठशालायां अहं पठामि
अस्यां लतायां कुसुमानि सन्ति

---

# पाठ ११

## इकारान्त उकारान्त अने ऋकारान्त पुलिंगी नामो

हरिः=हरि
अरिः=दुष्मन
ऋषिः=ऋषि
रविः=सुरज
कविः=कवि
नृपतिः=राजा
सारथिः=सारथि
अतिथिः=परोणो
यतिः=संन्यासी
कलिः=कलियुग

भानुः=सुरज
गुरुः=गुरु
साधुः=साधु
बाहुः=खंभो
शत्रुः=दुष्मन
मनुः=मनु
शिशुः=बच्चो
भिक्षुः=संन्यासी
बन्धुः=भाई
मृत्युः=मोत

कर्ता=करवावाळो
दाता=आपवावाळो
वक्ता=बोलवावाळो
श्रोता=सांभळवावाळो
सविता=सुरज
द्वेष्टा=द्वेषकरवावाळो
पिता=बाप
भ्राता=भाई
जामाता=जमाई

## कोशः

| | | |
|---|---|---|
| प्रणीतं=रचेलुं | दक्षिणा=दक्षिणा | विपुलम्=घणुं |
| पाठयति=भणावेछे. | दुर्लभः=मळवाने कठण एवो. | प्रकाशते=चळकेछे |
| वसुधा=पृथ्वी | सत्कारः=सत्कार. | जिता=जीतेली |
| च=अने | उपदिष्टः=बतावेलो | अरोगः=नीरोगी |
| दातव्यम्=आपवानुं | अधिगता=मेळवेली | अभिप्रायः=मतलब. |
| पीडा=पीडा | | |

## वाक्यो

अरिः मां पीडयति
ऋषिः रविं नमति
कविः नृपतिं वर्णयति
नृपतिः सारथिं पृच्छति
हरिः अतिथिं पूजयति
कविना एषा सभा शोभते
ऋषिणा प्रणीतं शास्त्रम्
अधिपतिना कृता आज्ञा
अतिथये दातव्यं अन्नम्
यतये दातव्यं पुस्तकम्
यतेः श्रुता हरिकथा
कवेः वचनं, ऋषेः आश्रमः
नृपतेः आज्ञा, अतिथेः सत्कारः
कलौ अधर्मः वर्धते
भानुः प्रकाशते
गुरुः कुप्यति
शत्रुः वर्धते
शिष्यः गुरुं नमति
ऋषयः मनुं पृच्छन्ति
गुरुः शिशुं पाठयति

शत्रुणा कृता पीडा
मनुना उपदिष्टः धर्मः
बाहुना जिता वसुधा
गुरवे दक्षिणा, भानवे नमः
गुरोः अधिगता विद्या
मृत्योः भयं, साधोः आगमनम्
बाहौ बलं वर्तते
बन्धौ मम स्नेहः वर्तते
दाता अरोगः भवति
वक्ता श्रोता च दुर्लभः
विश्वस्य कर्तारं नमामि
शिशुः पितरं भ्रातरं च वन्दते
दात्रा दत्तं धनं विपुलं अस्ति
भ्रात्रा कृतः उपदेशः अतीव रमणीयः
सवित्रे नमो नमः
जामात्रे दातव्यं वस्त्रम्
दातुः इच्छा, वक्तुः अभिप्रायः
पितुः कृपा, भ्रातुः उपदेशः
पितरि विश्वासः, द्वेष्टरि क्रोधः
हे पितः का आज्ञा अस्ति.

# पाठ १२

## इकारान्त अने ईकारान्त स्त्रीलिंगी शब्दो

### कोशः

| | | |
|---|---|---|
| रुचिः=रुचि | नीतिः=नीति | जननी=मा |
| कीर्तिः=कीर्ति | स्तुतिः=स्तुति | भागीरथी=भागीरथी |
| बुद्धिः=बुद्धि | श्रुतिः=वेद | गोदावरी=गोदावरी |
| सिद्धिः=सिद्धि | जातिः=जाति | पंचवटी=पंचवटी |
| शान्तिः=शान्ति | नदी=नदी. | रजनी=रात |
| मुक्तिः=मुक्ति | कुमारी=दीकरी | पुरी=शेहेर |
| कान्तिः=तेज | दासी=दासी | |
| भक्तिः=भक्ति | सखी=सखी | |
| लिखितम्=लखेलुं | शुध्यति=शुद्ध थायछे | कश्चित्=कोक |
| पत्रम्=पत्र | भूप=राजा | अलौकिकम्=विलक्षण |
| पालयति=रक्षण करेछे | भिन्नाः=जूदा | |

### वाक्यो

दिने दिने तव कीर्तिः वर्धते
ज्ञानेन बुद्धिः शुद्ध्यति
उद्यमेन कार्याणां सिद्धिः भवति
सः शान्तिं लभते
अहं मुक्तिं इच्छामि
सूर्यस्य कान्तिं पश्यामि
भक्त्या हरिः तुष्यति
नीत्या नृपाः शत्रून् जयन्ति
स्तुत्या जनाः तुष्यन्ति
कश्चित् यतति सिद्धये
भक्त्याः माहात्म्यं वर्धते

कुमारी भाषते
नदी वहति
दासी सेवते
कुमारी सखीं पृच्छति
नृपः महीं पालयति
रामः जननीं वन्दते
दास्या कृतं कार्यम्
कुमार्या लिखितं पत्रम्
भागीरथ्यै नमः
तस्यै जनन्यै नमः
गोदावर्याः भागीरथी श्रेष्ठा

| | |
|---|---|
| नीत्याः बलं अलौकिकम् | भागीरथ्याः जलं, पंचवट्याः शोभा |
| श्रुत्यां कथितः धर्मः | रामः पंचवट्यां वसति |
| नीत्यां निपुणः भूपः | रजन्यां चन्द्रः शोभते |
| जातौ जातौ आचाराः भिन्नाः | हे जननि तुभ्यं नमः |

## पाठ १३

### कर्मणि अने भावे प्रयोग.

#### कोशः

| | |
|---|---|
| श्रूयते=संभळायछे ( श्रु ) | ज्ञायते=जणायछे ( ज्ञा ) |
| हन्यते=हणायछे ( हन् ) | स्मर्यते=संभारवामां आवेछे ( स्मृ ) |
| जीयते=जीतायछे ( जी ) | पठ्यते=भणायछे ( पठ ) |
| नीयते=लई जवायछे ( नी ) | दृश्यते=देखायछे ( दृश ) |
| क्रियते=करायछे ( कृ ) | रुद्यते=रडायछे ( रुद ) |
| स्तूयते=स्तुती करायछे ( स्तु ) | जल्प्यते=बकाय छे ( जल्प् ) |
| प्राप्यते=मेळवायछे ( आप् ) | स्थीयते=उभुं रहेवायछे ( स्था ) |
| लभ्यते=मेळवायछे ( लभ् ) | प्रकाश्यते=शळगायछे ( काश् ) |
| दीयते=आपवामां आवेछे ( दा ) | कम्प्यते=कंपायछे ( कम्प ) |
| गीयते=गवायछे ( गा ) | भूयते=थवायछे ( भू ) |
| पीयते=पीवायछे ( पा ) | आर्यः=श्रेष्ठ पुरुष |
| सांख्यः=ज्ञानी | सुरा=दारु |
| श्रद्धालुः=श्रद्धावाळो माणस | |

#### वाक्यो

| कर्तरि | कर्मणि |
|---|---|
| रामः कथां शृणोति | रामेण कथा श्रूयते |
| रामः रावणं हन्ति | रामेण रावणः हन्यते |
| हरिः क्रोधं जयति | हरिणा क्रोधः जीयते |

| | |
|---|---|
| करी भारं नयति | करिणा भारः नीयते |
| कन्या पाकं करोति | कन्यया पाकः क्रियते |
| नारदः विष्णुं स्तौति | नारदेन विष्णुः स्तूयते |
| सांख्याः यत् स्थानं प्राप्नुवन्ति | सांख्यैः यत्स्थानं प्राप्यते |
| श्रद्धालुः ज्ञानं लभते | श्रद्धालुना ज्ञानं लभ्यते |
| पिता कन्यां ददाति | पित्रा कन्या दीयते |
| कन्या श्लोकं गायति | कन्यया श्लोकः गीयते |
| आर्याः सुरां न पिबन्ति | आर्यैः सुरा न पीयते |
| गुरुः धर्मं जानाति | गुरुणा धर्मः ज्ञायते |
| रामः सीतां स्मरति | रामेण सीता स्मर्यते |
| शिष्यः भारतं पठति | शिष्येण भारतं पठ्यते |
| भक्तः देवं पश्यति | भक्तेन देवः दृश्यते |
| बालाः रुदन्ति | बालैः रुद्यते |
| मूर्खाः जल्पन्ति | मूर्खैः जल्प्यते |
| अश्वाः तिष्ठन्ति | अश्वैः स्थीयते |
| सूर्यः प्रकाशते | सूर्येण प्रकाश्यते |
| वृक्षः कम्पते | वृक्षेण कम्प्यते |
| रामः भवति | रामेण भूयते |

---

# पाठ १४

## परस्मैपदी अने आत्मनेपदी क्रियापदोनो भूतकाळ

| | | | | | |
|---|---|---|---|---|---|
| आसीत् | आस्तां | आसन् | अकरोत् | अकुरुताम् | अकुर्वन् |
| आसीः | आस्तं | आस्त | अकरोः | अकुरुतं | अकुरुत |
| आसम् | आस्व | आस्म | अकरवम् | अकुर्व | अकुर्म |
| अभवत् | अभवताम् | अभवन् | अरमत | अरमेताम् | अरमन्त |
| अभवः | अभवतम् | अभवत | अरमथाः | अरमेथाम् | अरमध्वम् |
| अभवम् | अभवाव | अभवाम | अरमे | अरमावहि | अरमामहि |

## कोशः

| | | |
|---|---|---|
| सह=साथे | वृत्तान्तः=खबर | अकरोत्=करतो हतो |
| धेनुः=गाय | विपुलं=घणुं | आसीत्=हतो |
| बलात्=जुलमथी | तीरं=कांठो | निर्भयाः=भयविनाना |
| समीपे=पासे | अभवत्=थयो | |
| पश्चात्=पछी | अरमत=रमतो हतो | |

## वाक्यो

रामः सीतया सह वनं अगच्छत्
विश्वामित्रः वसिष्ठस्य धेनुं बलात् अहरत्
वाल्मीकेः आश्रमस्य समीपे लक्ष्मणः सीतां अत्यजत्
पश्चात् वने सीतायाः किं अभवत्
संजयः धृतराष्ट्राय युद्धस्य वृत्तान्तं अकथयत्
चोरः रात्रौ विपुलं धनं अचोरयत्
रामचन्द्रः लक्ष्मणं अवदत्
पुत्रशोकः दशरथं पीडयत्
रामः युद्धं अकरोत्
रामः रावणं अजयत्
उद्यमेन हरेः क्लेशः अनश्यत्
बालः समुद्रस्य तीरे अरमत
हरिः उद्यमात् धनं अलभत
श्रीकृष्णः अर्जुनस्य कल्याणाय अयतत
दशरथः कौसल्यां अभाषत
वातेन वृक्षः अकम्पत
पुरा ब्राह्मणाः निर्भयाः आसन्
तत्र त्वं किं अकरोः

---

# पाठ १५

## परस्मैपदी अने आत्मनेपदी क्रियापदोना आज्ञार्थनां रूपो

| | | | | | |
|---|---|---|---|---|---|
| भवतु | भवतां | भवन्तु | रमताम् | रमेताम् | रमन्ताम् |
| भव | भवतं | भवत | रमस्व | रमेथाम् | रमध्वम् |
| भवानि | भवाव | भवाम | रमै | रमावहै | रमामहै |
| अस्तु | स्तां | सन्तु | करोतु | कुरुताम् | कुर्वन्तु |
| एधि | स्तं | स्त | कुरु | कुरुतं | कुरुत |
| असानि | असाव | असाम | करवाणि | करवाव | करवाम |

## कोशः

भद्रम्=कल्याण
घृतम्=घी
आयुष्मान्=आयुष्य-वाळो
पुत्रवान्=दीकरावाळो
भवतु=थाय, थवादो
रमताम्=रमे-रमवादो
अस्तु=थाय, भले थाय थवादो,
करोतु=करे

निपुणाः=कुशळ एवा पुरुषो
यदि वा स्तुवन्तु=अथवातो भले स्तुती करे
समाविशतु=घरमां आवे
वा=अथवा,
यथेष्टं=मरजीमां आवे तेम

अद्यैव=आजेज
युगान्तरे=बीजा युगमां
न्यायात्पथः=न्यायना मार्गमांहेथी
पदं न प्रविचलन्ति=एक पगलुं पग खसी शकता नथी
धीराः=धैर्यवान् पुरुषो

## वाक्यो

जनानां कल्याणं भवतु
दूतः अयोध्यां गच्छतु
नृपः प्रजां पुत्रवत् पालयतु
जनानां पीडाः नश्यन्तु
बन्धवः बन्धून् न त्यजन्तु
लोकाःसंकटानितरन्तुभद्राणिपश्यन्तु
वत्स जनकं प्रणम
जलं त्यज घृतं पिब
सत्यं वद धर्मं चर
आयुष्मान् भव पुत्रवान् भव

चित्तं आनंदं लभतां
जनाः सदा मोदन्ताम्
धर्मे अनुरागः वर्धताम्
श्रीरामे चित्तं रमताम्
देव अपराधान् क्षमस्व
शत्रुभिः सह युध्यस्व जयं च लभस्व
त्वं यत् यत् इच्छसि तत् तत् अस्तु
तव शत्रवः मित्राणि सन्तु
जनाः उत्सवं कुर्वन्तु
हे तात अहं किं करवाणि

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः

# पाठ १६

## परस्मैपदी अने आत्मनेपदी क्रियापदोना विध्यर्थनां रूपो

| | | | | | |
|---|---|---|---|---|---|
| भवेत् | भवेतां | भवेयुः | रमेत | रमेयाताम् | रमेरन् |
| भवेः | भवेतम् | भवेत | रमेथाः | रमेयाथाम् | रमेध्वम् |
| भवेयं | भवेव | भवेम | रमेय | रमेवहि | रमेमहि |
| स्यात् | स्याताम् | स्युः | कुर्यात् | कुर्यातां | कुर्युः |
| स्याः | स्यातम् | स्यात | कुर्याः | कुर्यातं | कुर्यात |
| स्याम् | स्याव | स्याम | कुर्याम् | कुर्याव | कुर्याम |

### कोशः

सुरा=दारु पलांडुः=कांदो वृथाचेष्टा=व्यर्थचाळा बाल्यं=बचपण

### वाक्यो

यत्र ग्रामे नदी न स्यात् तत्र न वसेत्
संकटे मित्रं न त्यजेत्
दुर्जनस्य गृहं न गच्छेत्
न सुरां पिबेत्, न पलांडुं भक्षयेत्
वृथा चेष्टां न कुर्यात्
बाल्ये बालाः रमेरन्
भ्रातरः सहवसेयुः. सत्संगतिं च कुर्युः
नित्यं शास्त्राणि ईक्षेत
सततं गुरून् सेवेत
ज्ञानाय सततं यतेत
सत्यं प्रियं च भाषेत
यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः

---

# पाठ १७

## इन्नन्त अने मत्वन्त पुंलिंगी नामो तेमज परस्मैपदी अने आत्मनेपदी क्रियापदोना भविष्यत् काळनां रूपो

| | | | | | |
|---|---|---|---|---|---|
| करिष्यति | करिष्यतः | करिष्यन्ति | करिष्यते | करिष्येते | करिष्यन्ते |
| करिष्यसि | करिष्यथः | करिष्यथ | करिष्यसे | करिष्येथे | करिष्यध्वे |
| करिष्यामि | करिष्यावः | करिष्यामः | करिष्ये | करिष्यावहे | करिष्यामहे |

## कोशः

करी=हाथी
पक्षी=पक्षी
रोगी=रोगी
योगी=योगी
स्वामी=धणी
अपराधी=गुन्हेगार
प्राणी=प्राणी
साक्षी=साक्षिदार
प्रवासी=मुसाफर
गुणी=गुणी
दुःखी=दुखी

रूपवान्=रुपाळो
गुणवान्=गुणी
बुद्धिमान्=डाह्यो
पुण्यवान्=पुण्यवान्
आयुष्मान्=आयुष्य-वाळो
धनवान्=धनिक
विद्यावान्=विद्वान्
भगवान्=भगवान्
दयावान्=दयाळु
भविष्यति=थशे

अध्येष्यते=भणशे
करिष्यते=करशे
उपदेक्ष्यति=उपदेश करशे
तरिष्यति=तरशे
प्रहास्यति=तजीदेशे
श्रोष्यति=सांभळशे
विनंक्ष्यति=नाश पामशे
निवसिष्यति=रहेशे
गमिष्यति=जशे

## वाक्यो

करी वनं गच्छति
रोगी औषधं पिबति
योगी देवं भजति
दासः स्वामिनं सेवते
नृपः अपराधिनं दण्डयति
प्रवासिना लिखितः वृत्तान्तः
गुणिना तेन लब्धं धनं
दुःखिना तेन नृपेण
रोगिणे औषधं दातव्यम्
साक्षिणे धनं दातव्यम्
योगिनां चित्तं कोमलं भवति
पक्षिणां गतिः आकाशे भवति
प्राणिषु मनुष्यः श्रेष्ठः
पक्षिषु काकः चतुरः
पुण्यवान् आयुष्मान् भवति
गुणवान् धनवान् न भवति

दयावता भगवता मम वचनं श्रुतम्
बुद्धिमते कन्यां प्रयच्छेत्
भगवते वासुदेवाय नमः
विद्यावतां सकलमेव चरित्रमन्यत्
बुद्धिमतां वरिष्ठः मारुतिः
बुद्धिमत्सु नराः श्रेष्ठाः
वयं सर्वे न भविष्यामः इति न
आवयोः इमं संवादं यः अध्येष्यते
करिष्ये वचनं तव
ज्ञानिनः ज्ञानं उपदेक्ष्यन्ति
सर्वं पापं तरिष्यसि
कर्मबन्धं प्रहास्यसि
न श्रोष्यसि विनंक्ष्यसि
निवसिष्यसि मय्येव
रात्रिर्गमिष्यति भविष्यति सुप्र-भातम्

# पाठ १८

## क्त्वा अने ल्यप् प्रत्ययान्तकृदन्तो अने उपसर्गो

| | | |
|---|---|---|
| गृहीत्वा=ग्रहण करीने | भुक्त्वा=भोगवीने | निहत्य=मारीने |
| त्यक्त्वा=तजीने | कृत्वा=करीने | अनुभूय=अनुभवलई |
| दृष्ट्वा=जोईने | गत्वा=जईने | विहाय=तजिने |
| हत्वा=मारीने | संगृह्य=ग्रहण करीने | उपभुज्य=खाईने |
| भूत्वा=थईने | संत्यज्य=तजिने | उपकृत्य=उपकार करीने |
| हित्वा=तजिने | संदृश्य=जोईने | उपसंगम्य=पासे जईने |

उपसर्गो—प्र, परा, अप, सम्, अनु, अव्, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, उपसर्गेण धात्वर्थो वलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥

### कोशः

| | | |
|---|---|---|
| याति=आवेछे | सएव=तेनातेज | धार्तराष्ट्राः=धृतराष्ट्र राजाना दीकराओ |
| अनीकं=सैन्य | प्रलीयते=लीनथई जायछे | का प्रीतिः स्यात्=शुं सारूं थाय ? |
| आहवः=युद्ध | विशालः=पोहोळो | विषं=जेर |
| भूतग्रामः=प्राणीओनो समुदाय | कर्म=करम | |

### वाक्यो

वृद्धो याति गृहीत्वा दण्डम्
प्राणांस्त्यक्त्वा धनानि च
दृष्ट्वा तु पाण्डवानीकम्
हत्वा स्वजनमाहवे
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते
स्वधर्मं कीर्तिं च हित्वा
ते तं भुक्त्वा स्वर्गलोकं विशालं

शास्त्रस्य सारं संगृह्य
संत्यज्य कामं क्रोधं च
एकस्य कर्म संवीक्ष्य
धार्तराष्ट्रान् निहत्य का प्रीतिः स्यात्
अनुभूय सुखं दुःखम्
स त्वं निवर्तस्व विहाय लज्जां
उपभुज्य विषं मृतः

# पाठ १९

## तुमुन् तव्य अनीयर् अने य प्रत्ययान्त कृदन्तो

अर्चितुं=पूजवाने
कर्तुम्=करवाने
छेत्तुम्=कापवाने
अवस्थातुम्=उभा रेहे-वाने
विज्ञातुम्=जाणवाने
निवर्तितुम्=निवृत्त थवाने
शोचितुम्=शोक करवाने
द्रष्टुम्=जोवाने
वेदितुम्=जणवाने
उपभोक्तुम्=उप-भोगलेवाने

त्यक्तुम्=तजवाने.
परिमार्गितव्यम्=गो-तवुं
मन्तव्यः=मानवो
कर्तव्यं=करवुं
सेवितव्यः=सेवनकरवो
वक्तव्यम्=बोलवुं
द्रष्टव्यः=जोवो
श्रोतव्यः=सांभळवो
मन्तव्यः=मानवो
निदिध्यासितव्यः=ध्यान धरवुं
दातव्यम्=आपवुं
भोक्तव्यम्=खावुं

दर्शनीयं=जोवा योग्य
हरणीयं=हरण करवुं
उच्चरणीयम्=बोलवुं
स्मरणीयम्=संभारवुं
तरणीयं=तरवुं
ज्ञेयम्=जाणवुं
कार्यम्=करवुं
त्याज्यम्=तजवुं
वाच्यम्=बोलवुं
ग्राह्यम्=ग्रहण करवुं
गेयम्=गावुं
ध्येयम्=ध्यान धरवुं
नेयम्=गाळवुं
देयम्=आपवुं

## कोशः

तनुः=शरीर
अहोबत=अरेरे
महत्=मोहोटुं
व्यवसिताः=लागेला
अर्हसि=तुं योग्य छे,
अशेषतः=नीशेपरीते
शक्नोमि=शक्तिमान् थाउंछुं
भवान्=आप

पदं=स्थान
एव=ज
हितं=हितकारक
प्रियं=मीठुं
दोषवत्=दोषवाळुं
एके मनीषिणः=केट-लाक विद्वानो
इति प्राहुः=एम कहेछे
इत्थं=एवीरीते

अर्थः=माल
कस्यचित्=कोईनुं
किमपि=कांईपण
नो=नहि
श्रीपति=विष्णु
पदयुग=बे चरण
लीलया=सेहेज.
भवजलं=संसारसमुद्र

| | | |
|---|---|---|
| आद्यः=श्रेष्ठ | सति विभवे=वैभव छतां | नाम सहस्रं=विष्णु-सहस्रनाम |
| महाबाहुः=जेना बाहुओ लांबा छे एवो | मधुकरी=मधमाख | अजस्रं=हमेशा |
| जरी=घरडो. | संचितः=भेगो करेलो | वित्तं=धन |

## वाक्यो

यो यो यां यां तनुं भक्तः—
श्रद्धयार्चितुमिच्छति
अहो बत महत्पापं—
कर्तुं व्यवसिता वयम्
एतं मे संशयं कृष्ण—
छेत्तुमर्हस्यशेषतः
नच शक्नोम्यवस्थातुम्
विज्ञातुमिच्छामि भवन्तमाद्यम्
पापादस्मान्निवर्तितुम्
न त्वं शोचितुमर्हसि
द्रष्टुमिच्छामि ते रूपम्
संन्यासस्य महाबाहो—
तत्त्वमिच्छामि वेदितुम्
नोपभोक्तुं नच त्यक्तुं—
शक्नोति विषयान् जरी.
ततः पदं तत् परिमार्गितव्यम्
साधुरेव स मन्तव्यः
न मे पार्थास्ति कर्तव्यम्
सेवितव्यो महान् वृक्षः
हितं प्रियं च वक्तव्यम्
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो
मन्तव्यो निदिध्यासितव्यः
सएव वक्ता सच दर्शनीयः
कथं न ज्ञेयमस्माभिः
तस्य कार्यं न विद्यते
त्याज्यं दोषवदित्येके—
कर्म प्राहुर्मनीषिणः
नवाच्यमित्थं पुरुषोत्तम त्वया
विषादप्यमृतं ग्राह्यम्
१ दातव्यं भोक्तव्यं—
सति विभवे संग्रहो न कर्तव्यः
पश्यामि मधुकरीणां—
संचितमर्थं हरन्त्यन्ये.
कस्यचित् किमपि नो हरणीयम्
मर्मवाक्यमपि नोच्चरणीयम्
श्रीपतेः पदयुगं स्मरणीयम्
लीलया भवजलं तरणीयम्
गेयं गीता नामसहस्रम्
ध्येयं श्रीपतिरूपमजस्रम्
नेयं सज्जनसंगे चित्तम्
देयं दीनजनाय च वित्तम्

# पाठ २०

## क्त क्तवतु प्रत्ययान्त कृदन्तो

| | | |
|---|---|---|
| गतः=गयो | कृता=करवामां आवी | हतः=हणायो |
| स्थितः=उभोरह्यो | प्राप्तम्=मेळवायुं | उपदिष्टं=बतावामां आव्युं |
| कथितः=कहेवामां आव्यो | श्रुतं=सांभळयुं | दग्धम्=बाळवामां आव्युं |
| धृतः=धारणकरवामां आव्यो | दत्तः=आप्यो | |
| | प्रोक्तः=कहेवामां आव्यो | |

## वाक्यो

| क्त | क्तवतु |
|---|---|
| रामः वनं गतः | रामः वनं गतवान् |
| हरिः तत्र स्थितः | हरिः तत्र स्थितवान् |
| दूतेन वृत्तान्तः कथितः | दूतः वृत्तान्तं कथितवान् |
| देवेन अवताराः धृताः | देवः अवतारान् धृतवान् |
| कृष्णेन लीला कृता | कृष्णः लीलां कृतवान् |
| पृथुना राज्यं प्राप्तम् | पृथुः राज्यं प्राप्तवान् |
| मया पुराणं श्रुतम् | अहं पुराणं श्रुतवान् |
| महादेवेन वरः दत्तः | महादेवः वरं दत्तवान् |
| मया योगः प्रोक्तः | अहं योगं प्रोक्तवान् |
| रामेण रावणः हतः | रामः रावणं हतवान् |
| गुरुणा शास्त्रं उपदिष्टम् | गुरुः शास्त्रं उपदिष्टवान् |
| अर्जुनेन खाण्डवं दग्धम् | अर्जुनः खाण्डवं दग्धवान् |

# पाठ २१

## शतृ–शानच् प्रत्ययान्तकृदन्तो

| | | |
|---|---|---|
| गच्छन्=जतो | पिबन्=पीतो | यजमानः=यज्ञ करतो |
| विलोकयन्=अवलोकन करतो | इच्छन्=इछतो | कम्पमानः=धुजतो |
| पठन्=भणतो | ध्यायन्=ध्यान धरतो | भाषमाणः=बोलतो |
| पश्यन्=जोतो | दहन्=बाळतो | याचमानः=मागतो |
| जीवन्=जीवतो | वर्धमानः=वधतो | जायमानः=उत्पन्न थतो |
| गायन्=गातो | पीड्यमानः=पीडातो | ईक्षमाणः=जोतो |
| पतन्=पडतो | दीयमान=अपातुं | रममाणः=रमतो |
| कुर्वन्=करतो | श्रूयमाणा=संभळाती | विद्यमानं=होतुं |

## वाक्यो

शालां गच्छन् विद्यार्थी
शास्त्रं विलोकयन् पंडितः
श्लोकं पठन्ती कुमारी
गीतां गायन् साधुः
पश्यन्नपि नच पश्यति लोकः
सः पुरुषः जीवन्नपि मृतः
अहं श्लोकं पठन्तं कुमारं अपश्यम्
सुतं पतन्तं प्रसमीक्ष्य पावके
काव्यं कुर्वता तेन कविना
उदकं पिबता पान्थेन
भूतिं इच्छता पुरुषेण
संध्यां कुर्वते ब्राह्मणाय नमः
विषयान् ध्यायतः पुरुषस्य चित्तम्
वनानि दहतः वन्हेः तेजः

न्यायं कुर्वति त्वयि कथं न विश्वासः
दिने दिने वर्धमानः व्याधिः
दुःखेन पीड्यमानः पुरुषः
दात्रा दीयमानं धनम्
श्रोत्रा श्रूयमाणा हरिकथा
यजमानेन दशरथेन ऋष्यशृंगःआहूतः
कम्पमानेन तेन बालेननकिमपि उक्तम्
एवंभाषमाणेन तेन ऋषिणा
याचमानाय दीनाय धनं दातव्यम्
शरीरे जायमानस्य दुःखस्य नाशःभवतु
सीतां ईक्षमाणस्य जनकस्य चित्तं
विषयेषु रममाणानां पुरुषाणां
का गतिः
तत्र विद्यमानेषु पुस्तकेषु

# पाठ २२

## अथ समासविधिः कथ्यते

समासाः पञ्चविधाः । तत्पुरुषः कर्मधारयो बहुव्रीहिर्द्विगुर्द्वन्द्वोऽव्ययीभावश्चेति । तल्लक्षणानितु । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । उभयपदार्थप्रधानो द्वन्द्वः । अन्यपदार्थप्रधानो बहुव्रीहिः । द्विगुकर्मधारयौ तत्पुरुषभेदौ । समासार्थावबोधकं वाक्यं विग्रहः । समासस्य प्रथमावयवः पूर्वपदम् । चरमावयव उत्तरपदम् । तेषु समासेषु तत्पुरुषक्रमःअष्टधा । प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पंचमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्तत्पुरुषश्चेति । तत्र

**प्रथमात.—** अर्धम्+पिप्पल्याः=अर्धपिप्पली–अर्धीपिपळ
पूर्वम्+कायस्य=पूर्वकायः–शरीरनो उपरनो भाग

**द्वितीयात.** कृष्णम्+श्रितः=कृष्णश्रितः–कृष्णनो आश्रित
ग्रामम्+गतः=ग्रामगतः–गाम गयेलो.
संकटम्+अतीतः=संकटातीतः–संकटने ओळंगी गयेलो

**तृतीयात.** भीमेन+अभिरक्षितम्=भीमाभिरक्षितम्–भीमे रक्षायेलुं
पराक्रमेण+अर्जितम्=पराक्रमार्जितम्–पराक्रमवडे मेळवायेलुं

**चतुर्थीत.** गुरवे+दक्षिणा=गुरुदक्षिणा–गुरुने माटे दक्षिणा
कुण्डलाय+हिरण्यम्=कुण्डलहिरण्यम्–कुंडलनेमाटे सोनुं

**पंचमीत.** सिंहात्+भयम्=सिंहभयम्–सिंहथी भय
धर्मात्+भ्रष्टः=धर्मभ्रष्टः–धरमथी खसी गयेलो.

**षष्ठीत.** कृष्णस्य+भक्तः=कृष्णभक्तः–कृष्णनो भगत
नृपस्य+कन्या=नृपकन्या–राजानी दीकरी.

**सप्तमीत.** विद्यायाम्+निपुणः=विद्यानिपुणः–विद्यामां निपुण
युद्धे+विशारदः=युद्धविशारदः–युद्धमां कुशल

नञ्त. न+ब्राह्मणः=अब्राह्मणः–जे ब्राह्मण नही ते
न+अध्यायः=अनध्यायः–अध्ययननो अभाव.

इति तत्पुरुषः

अथ कर्मधारयः कथ्यते स च सप्तविधः । विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपदः संभावनापूर्वपदोऽवधारणापूर्वपदश्चेति तत्र

विशेषणपू.—कृष्णश्चासौ+सर्पश्च=कृष्णसर्पः–काळो साप
कृष्णौ च तौ+सर्पौ च=कृष्णसर्पौ–काळा बे सापो
कृष्णाश्च ते+सर्पाश्च=कृष्णसर्पाः–काळा सापो
रक्ता चासौ+लता च–रक्तलता–राती वेल
रक्ते च ते+लते च=रक्तलते–राती बे वेलो
रक्ताश्च ताः+लताश्च=रक्तलताः–राती वेलो
नीलं च तत्+उत्पलं च=नीलोत्पलम्–आसमानी रंगनुं कमळ
नीले च ते+उत्पले च=नीलोत्पले–आसमानी रंगनां बे कमळो
नीलानि च तानि+उत्पलानिच=नीलोत्पलानि–आसमानी रंगनां कमळो

विशेष्यपू.—वैय्याकरणश्चासौ+खसूचिश्च=वैयाकरणखसूचिः–आकाश तरफ जोवावाळो व्याकरण शीखेलो माणस

विशेषणोभ.—शीतं च तत्+उष्णंच=शीतोष्णम्–न वधारे थंडुं के न वधारे उनुं एवुं

उपमानपू. मेघ इव+श्यामः=मेघश्यामः=वादळा जेवो काळो
चन्द्रवत्+मुखम्=चन्द्रमुखम्–चंद्र जेवुं मोढुं

उपमानोत्तरप. पुरुषः+व्याघ्र इव=पुरुषव्याघ्रः=वाघजेवो ( शूर ) पुरुष.
नरः+सिंह इव=नरसिंहः=सिंह जेवो नर

संभावनापू. गुण इति+बुद्धिः=गुणबुद्धिः–गुण छे एवी वुद्धि

अवधारणापू. विद्यैव+धनम्=विद्याधनम्=विद्यारूपी धन

अविद्यैव+शृंखला=अविद्याशृंखला–अविद्यारूपी बेडी

मध्यमपदलोपी समासः—शाकप्रियः+पार्थिवः=शाकपार्थिवः–जेने शाक वहालुं छे एवो राजा

इति कर्मधारयः

अथ बहुव्रीहिः कथ्यते। सच त्रिविधः। द्विपदो बहुपदः सहपूर्वपदश्चेति। तत्र

द्विपदव.—प्राप्तम्+उदकं यं सः=प्राप्तोदको ग्रामः–प्राप्त थयुं छे उदक जेने ते गाम

कृतम्+कृत्यं येन सः=कृतकृत्यो भूपः–कर्युं छे कर्तव्य कर्म जेणे एवो राजा

दत्तम्+धनं यस्मै सः=दत्तधनो ब्राह्मणः–आप्युं छे धन जेने एवो ब्राह्मण.

उद्धृतः+सारो यस्मात्तत्=उद्धृतसारं दुग्धम्–काढी लीधो छे सार जे मांहेथी एवुं दुध

छिन्नः+हस्तो यस्य सः=छिन्नहस्तश्चोरः–कापीनांख्यो छे हाथ जेनो एवो चोर

चक्रम्+पाणौ यस्य सः=चक्रपाणिः हरिः–चक्र छे हाथमां जेना एवो श्रीहरि

पुष्पिताः+द्रुमाः यस्मिन् तत्=पुष्पितद्रुमं वनम्–फुलेलां छे वृक्षो जेमां एवुं वन

खरस्य+मुखमिव मुखं यस्य सः=खरमुखस्तुरगः–गधेडाना मोढा जेवुं छे मोढुं जेनुं एवो घोडो

उष्ट्रस्य+मुखमिव मुखं यस्यः=उष्ट्रमुखो यक्षः–उंटना मोढा जेवुं छे मोढुं जेनुं एवो यक्ष

वहुपदव.—अधिकः+उन्नतः=अंसः यस्य सः=अधिकोन्नतांसो भूपः–अधिक उंचो छे खभो जेनो एवो राजा

सहपूर्व—सह+कृष्णेन वर्तत इति=सकृष्णो बलरामः–कृष्णनी साथे रहेलो एवो बलराम

इति बहुव्रीहिः

अथ द्विगुः, द्विगुसमासो द्विविधः। एकवद्भावी अनेकवद्भावीचेति। तत्र

एकवद्भावी त्रयाणां+श्रृंगाणां समाहारः=त्रिश्रृंगम्–त्रण शींगडाओनो समुदाय ते

पंचानां+फलानां समाहारः=पंचफली–पांच फळोनो समुदाय ते

अनेकव.—सप्तच ते+ऋपयश्च=सप्तर्पयः–सात ऋषीओ

इति द्विगुः

अथद्वंद्वः। द्वंद्वोपि द्विविधः। इतरेतरद्वंद्वः समाहारद्वंद्वश्चेति। तत्र

इतरेतरद्वं.—रामश्च+कृष्णश्च=रामकृष्णौ–राम अने कृष्ण

साहित्यं च+संगीतं च+कलाश्च+साहित्यसंगीतकलाः–साहित्य शास्त्र संगीत अने कलाओ ते

समाहारद्वं.—हरिश्च+हरश्च+गुरुश्च एषां समाहारः=हरिहरगुरु–हरि हर अने गुरु ए त्रणेनो समुदाय ते

धनं च+धान्यंच अनयोः समाहारः=धनधान्यम्–धन अने धान्य ए बनेनो समुदाय ते

इतिद्वंद्वः। अथाव्ययीभावः

रामस्य पश्चात्=इति अनुरामम्–रामनी पछवाडे

गंगायाः समीपे इति=अनुगंगम्–गंगाजीनी पासे

दिने दिने इति=प्रतिदिनम्–दहाडे दहाडे

विधिं अनतिक्रम्यइति=यथाविधि–विधिप्रमाणे.

---

तव+पुत्रः=त्वत्पुत्रः तारो दीकरो
मम+पुत्रः=मत्पुत्रः मारो दीकरो
युष्माकं+पुत्रः=युष्मत्पुत्रः तमारो दीकरो
अस्माकं+पुत्रः=अस्मत्पुत्रः अमारो दीकरो
नविद्यते+धनंयस्यसः=अधनः जेनीपासे धन नथी ते
निर्गता+लज्जायस्मात्सः=निर्लज्जः जेने शरम नथी ते
विगतः+धवः यस्याःसा=विधवा जेनो धणी गुजरी गयो ते
शोभनं+शीलं यस्यसः=सुशीलः सारो छे स्वभाव जेनो ते
दुष्टं+शीलं यस्यसः=दुःशीलः खराब छे स्वभाव जेनो ते
सुष्टु+भाषितं=सुभाषितं सारुं भाषण
कुत्सितं+भोजनं=कुभोजनम् खराब भोजन

---

कुंभं+करोतीति=कुंभकारः घडाने बनावे छे तेथी
शरीरे+तिष्ठतीति=शरीरस्थः शरीरमां रहे छे तेथी
धनं+ददातीति=धनदः धनने आपे छे तेथी
सोमं+पिबतीति=सोमपः सोमरसने पीएछे तेथी
प्रयागे+वसतीति=प्रयागवासी प्रयागमां रहेछे तेथी
कर्तुं+योग्यं=कर्तव्यं, कार्यं, करणीयम् करवाने योग्य
गच्छतीति=गच्छन् जायछे तेथी
यजते इति=यजमानः यज्ञ करेछे तेथी
सुखेन+लभ्यते इति=सुलभं सेहेलाईथी मेळवायछे तेथी
दुःखेन+लभ्यते इति=दुर्लभं मुपीव्रते मेळवायछे तेथी
कर्तुं+इच्छुः=चिकीर्षुः करवाने चहावावाळो
गरुड इव+आचरति=गरुडायते गरुडनी पेठे वर्ते छे

---

दशरथस्य+अपत्यं पुमान्=दाशरथिः दाशरथनो पुत्र ते

सुभद्रायाः+अपत्यं पुमान्=सौभद्रः सुभद्रानो दीकरो

गंगायाः+अपत्यं पुमान्=गांगेयः गंगानो दीकरो

जनकस्य+अपत्यं स्त्री=जानकी जनकनी दीकरी

शरीरे+भवः=शारीरः शरीरने लगतो

मम+अयं=मामकः, मामकीनः, मदीयः मारो

तव+अयं=तावकः, तावकीनः, त्वदीयः तारो.

मूर्खस्य+भावः=मूर्खता, मूर्खत्वं, मौर्ख्यं मूर्खपणुं.

पुत्रेण+तुल्यं=पुत्रवत् दीकरा जेवुं

अपुत्रः पुत्रः संपद्यते तथा कृतः=पुत्रीकृतः दीकरा जेवो मानेलो

गुणः अस्यातीति=गुणी, गुणवान् गुण जेने छे ते

अतिशयेन मूढः=मूढतमः तदन मूर्ख

---

# काव्यविनोद

## भाग २ जो

### पाठ १

१ प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता
२ विद्याभ्यासो विचारश्च समयोरेव शोभते
विवादश्च विवाहश्च समयोरेव शोभते
३ दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः
ससर्पे च गृहे वासो मृत्युरेव न संशयः
४ शनैः पन्थाः शनैः कन्था शनैः पर्वतमस्तके
शनैर्विद्या शनैर्वित्तं पंचैतानि शनैः शनैः
५ जीवन्तोऽपि मृताः पंच व्यासेन परिकीर्तिताः
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः
६ उदारस्य तृणं वित्तं शूरस्य मरणं तृणम्
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत्
७ शूराश्च कृतविद्याश्च रूपवत्यश्च योषितः
यत्र यत्र गमिष्यन्ति तत्र तत्र कृतादराः
८ अतिपरिचयादवज्ञा संततगमनादनादरो भवति
लोकः प्रयागवासी कूपे स्नानं समाचरति

९ अतिपरिचयादवज्ञा इति यद्वाक्यं मृषैव तद्भाति
अतिपरिचितेप्यनादौ संसारेऽस्मिन् न जायतेऽवज्ञा

१० साहित्यसंगीतकलाविहीनः साक्षात्पशुःपुच्छविषाणहीनः
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्

## कोशः

प्रदानं=आपवुं ते.
जन्तुः=प्राणी
तस्मात्=ते कारणथी
वक्तव्यम्=बोलवुं—वक्तुं योग्यं
दरिद्रता=गरिबाई—दरिद्रस्य भावः
समः=सरखो, तुल्य
शठम्=ठग,
दुष्टा=बगडीगयेली (दुष्)
उत्तरदायकः=सांभे जबाब आपवावाळो, सुखदा. दुःखदा.
ससर्पम्=सर्पवाळुं—सहसर्पेण वर्तत इति.
भृत्यः=चाकर
शनैः=हळवे.

पन्थाः=रस्तो—थानौ थानः
कंथा=गोदडी
मस्तकः=माथुं
वित्तं=धन
पंच=पांच
जीवन्=जीवतो, जीवतीति.
मृतः=मुवेलो
परिकीर्तितः=कहेलो, गयेलो
व्याधितः=रोगी
नित्यसेवकः=सदानो चाकर
स्पृहा=आशा, इच्छा
रूपवती=रुपाळी
योषित्=स्त्री.
आदरः=मान, सत्कार

अवज्ञा=अपमान, बेदरकारी
संततगमनम्=हमेश-आववुं जवुं ते
प्रयागवासी=प्रयागमां रहेवावाळो.
समाचरति=करेछे.
इति=एवीरीते, एवुं
मृषैव=तदन खोटुंज
भाति=लागेछे.
अतिपरिचितः=जेनो घणोज परिचय थयोछे एवो
विषाणम्=शींगडुं
भागधेयम्=भाग्य
परमम्=मोहोटुं

## पाठ २

१ अमंत्रमक्षरं नास्ति नास्ति मूलमनौषधम्
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः

२ जलबिन्दुनिपातेन क्रमशः पूर्यते घटः
स हेतुः सर्वविद्यानां धर्मस्यच धनस्यच

३ सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः
तत्र सौरभनिर्माणे चतुरश्चतुराननः

४ को न याति वशं लोके मुखे पिण्डेन पूरितः
मृदंगो मुखलेपेन करोति मधुरध्वनिम्.

५ सप्तैतानि न पूर्यन्ते पूर्यमाणान्यनेकशः
ब्राह्मणोऽग्निर्यमो राजा पयोधिरुदरं गृहम्.

६ अभ्रच्छाया खलप्रीतिर्नवसस्यानि योषितः
कंचित्कालोपभोग्यानि यौवनानि धनानि च

७ परोपि हितकृद्बन्धुः बन्धुरप्यहितः परः
अहितो देहजो व्याधिः हितमारण्यमौषधम्

८ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम्
शास्त्रपूतं वदेद्वाक्यं मनःपूतं समाचरेत्

९ देशाटनं पण्डितमित्रताच वारांगनाराजसभाप्रवेशः
अनेकशास्त्रार्थविलोकनं च चातुर्यमूलानि भवन्ति पंच

१० क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये वर्धति जाठरोऽग्निः
आपत्सु वैराणि समुद्भवन्ति छिद्रेष्वनर्था बहुलीभवन्ति

## कोशः

योजकः=योजना करवावाळो
बिन्दुः=टीपुं
निपातः=पडवुं
क्रमशः=क्रमेकरी
पूर्यते=भरायछे
घटः=घडो
हेतुः=साधन, कारण
सौवर्ण=सोनानुं सुवर्णस्य विकारः
सरोजं=कमळ
निर्मातुम्=निर्माण करवाने
शिल्पी=कारागीर
सौरभम्=सुगन्ध
निर्माणम्=उत्पन्न करवुं
चतुराननः=ब्रह्मा
वशंयाति=ताबे थायछे
पूरितः=पूर्ण करेलो.

पूर्यमाणम्=पूर्ण करवामां आवेलुं
अनेकशः=जुदीजुदी रीते, ( शस् )
पयोधिः=दरीयो
उदरं=पेट.
अभ्रम्=मेघ, वादळुं
सस्यम्=धान्य
कंचित्कालोपभोग्यानि=घणाज थोडा वखतलगण उपभोग लेवायोग्य
यौवनम्=जुवानी.
हितकृत्=हित करवावाळो
हितः=हित करवावाळो
अहितः=शत्रु
देहजः=देहमां उत्पन्न थयेलो

आरण्यम्=अरण्यमांहेलुं
पूतं=पवित्र करेलुं
न्यसेत्=मुकवो
अटनम्=फरवुं
वारांगना=वेश्या
मूलम्=कारण, साधन
क्षतम्=व्रण
प्रहारः=घा
अभीक्ष्णम् ( अ )=वारंवार
क्षयः=नाश
जाठरः=पेटमांहेलो
समुद्भवति=उत्पन्न थायछे
छिन्द्रम्=फाट, संकट
अनर्थाः=संकटो,
बहुलीभवन्ति=घणा थई पडेछे.

---

## पाठ ३

१ शोभन्ते विद्यया विप्राः क्षत्रिया विजयश्रिया
श्रियोऽनुकूलदानेन लज्जया च कुलांगनाः
२ ब्राह्मणा गणका वेश्याः सारमेयाश्च कुकुटाः
दृष्ट्वान्येषु कुप्यन्ति न जाने तस्य कारणम्
३ अश्वं नैव गजं नैव व्याघ्रं नैवच नैवच

अजापुत्रं बलिं दद्यात् देवो दुर्बलघातकः
४ भवन्ति नरकाः पापात् पापं दारिद्र्यसंभवम्
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत्
५ वनानि दहतो वह्नेः सखा भवति मारुतः
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम्
६ निःसारस्य पदार्थस्य प्रायेणाडंबरो महान्
नहि तादृग् ध्वनिः स्वर्णे यादृक् कांस्ये प्रजायते
७ द्वाविमौ पुरुषौ लोके न भूतौ न भविष्यतः
प्रार्थितं यश्च कुरुते यश्च नार्थयते परम्
८ द्वाविमौ पुरुषौ लोके शिरःशूलकरौ मतौ
गृहस्थश्च निरारंभो यतिश्च सपरिग्रहः
९ एको देवः केशवो वा शिवो वा, एकं मित्रं भूपतिर्वा यतिर्वा
एको वासः पत्तने वा वने वा, एका भार्या सुन्दरी वा दरी वा
१० यः परस्य विषमं विचिन्तयेत्, प्राप्नुयात्स कुमतिः स्वयंहि तत्
पूतना हरिवधार्थमाययौ, प्राप सैव वधमात्मनस्ततः

## कोशः

| | | |
|---|---|---|
| अनुकूलदानम्=सुपात्रे दान | दानपरः=दानमां तत्पर | शिरःशूलकरः=मांथुं दुखावे एवो |
| श्रीः=संपत्ति | दहन्=बाळतो | मतः=मानेलो |
| कुलांगना=कुलीन स्त्री | वन्हिः=देवता | निरारंभः=निरुद्योगी |
| गणकः=जोशी | सखा=मित्र | सपरिग्रहः=घरबारवाळो |
| सारमेयः=कुतरो | मारुतः=पवन | पत्तनं=शेहेर |
| कुक्कुटः=कुकडो | कृशः=दुबळो | |
| | सौहृदम्=मित्राई. | |

अन्येषुदृष्टेषु=बीजाने जोई.
बलिं दद्यात्=बलिदान आपवुं
घातकः=घात करवावाळो
नरकः=दुःख
संभवः=उत्पत्ति

निःसारः=जेमां कांई माल नहि ते
आडंबरः=भपको
तादृक्=तेवो
ध्वनिः=अवाज
भूतः=थयो.
प्रार्थितम्=चाहेलुं
अर्थयते=मांगेछे

दरी=गुफा
विषमं=माठुं
प्राप्नुयात्=पामे
स्वयम्=पोते
आययौ=आवी
प्राप=पामी
ततः=तेथी.

---

## पाठ ४

१ जानीयात् संगरे भृत्यान् बान्धवान् व्यसनागमे
आपत्काले तु मित्राणि भार्यां च विभवक्षये
२ पिपीलिकार्जितं धान्यं मक्षिकासंचितं मधु
लुब्धेनोपार्जितं द्रव्यं समूलं च विनश्यति
३ द्वाविमौ पुरुषौ लोके सुखिनौ न कदाचन
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः
४ मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च
असतां संप्रयोगेन पंडितोप्यवसीदति.
५ गतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान्
गतश्रीश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत
६ विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्
नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि
७ लुब्धमर्थेन गृह्णीयात् क्रुद्धमंजलिकर्मणा
मूर्खं छंदोनुरोधेन तत्वार्थेन च पण्डितम्
८ शत्रुर्दहति संयोगे वियोगे मित्रमप्यहो

उभयोर्दुःखदायित्वात् को भेदः शत्रुमित्रयोः

९ मांसं मृगाणां दशनौ गजानां, मृगद्विषां चर्म फलं द्रुमाणाम्
स्त्रीणां सुरूपंच नृणां हिरण्यं, एते गुणा वैरकरा भवन्ति.

१० भार्यावियोगः स्वजनापवादः, ऋणस्य शेषं कृपणस्य सेवा
विपत्तिकाले प्रियदर्शनंच, विनाग्निना पंच दहन्ति कायम्.

## कोशः

जानीयात्=जाणवुं
संगरः=युद्ध
व्यसनम्=संकट
पिपीलिका=कीडी
अर्जितं=मेळवेलुं
संचितं=भेगुं करेलुं
समूलं=साफ, तदन
अधनः=निर्धन
कामयते=इच्छाकरेछे
ईश्वरः=समर्थ
संप्रयोगः=संयोग
सन्=सत्पुरुष
अवसीदति=थाकीजायछे
चिकित्सकः=वैद्य
स्त्रीरत्नं=उत्तम स्त्री
लुब्धः=लोभीयो
गृण्हीयात्=वश करवुं
क्रुद्धः=घुस्से थयेलो
अंजलिकर्म=हाथ जोडवो ते
छंदोनुरोधः=तेनी मर्जीमुजब चालवुं, हा हा करवुं
तत्वार्थः=सत्य सत्य वात
उभयोः दुःखदायित्वात्=बेऊ दुःख आपवावाळा होवाथी
दशनः=दांत
मृगद्विट्=वाघ
अपवादः=निन्दा
विना=वगर, शिवाय

## पाठ ५

१ असारे खलु संसारे सारमेतच्चतुष्टयम्
काश्यां वासः सतां संगः गंगांभः शंभुसेवनम्

२ यान्ति न्यायप्रवृत्तस्य तिर्यंचोपि सहायताम्
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुंचति

३ वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः

आगतं समयं वीक्ष्य भिन्द्याद्धटमिवाश्मनि.

४. सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः
अर्धेन कुरुते कार्यं सर्वनाशो न जायते

५ अप्युन्नतपदारूढः पूज्यान्नैवापमानयेत्
नहुषः शक्रतां प्राप्य च्युतोगस्त्यावमाननात्

६ उत्तमा आत्मनाख्याताः पितुः ख्याताश्च मध्यमाः
अधमा मातुलात्ख्याताः श्वशुराच्चाधमाधमाः

७ घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्

८ विरला जानन्ति गुणान्, विरलाः कुर्वन्ति निर्धने स्नेहम्
विरलाः परकार्यरताः, परदुःखेनापि दुःखिता विरलाः

९ दधि मधुरं मधु मधुरं, द्राक्षा मधुरा सुधापि मधुरैव
तस्य तदेव हि मधुरं, यस्य मनो यत्र संलग्नम्

१० मृगा मृगैः संगमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरंगैः
मुर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशीलव्यसनेषु सख्यम्

## कोशः

| | | |
|---|---|---|
| अंभः=पाणी | कालविपर्ययः=ऊंधोवखत | रासभरोहणं=गधेडे बेसवुं ते |
| न्यायप्रवृत्तः=नीतीथी चालतो. | भिन्द्यात्=भांगीनाखवुं | येन केन प्रकारेण=गमे तेवी रीते |
| तिर्यंचोपि=पशुपक्षीओ पण | अश्मा=पथ्थर | रतः=रमी रहेलो |
| सहायतां यान्ति=मदत करेछे | सर्वनाशे समुत्पन्ने=बधुं जवानो वखत आवे त्यारे | सुधा=अमृत |
| | | संलग्नम्=चोंटीगयेलुं |

| | | |
|---|---|---|
| अपन्थानं गच्छन्=आडे मार्गे चालतो | आरूढः=चढीबेसेलो | संगमनुव्रजन्ति=संगत करछे. |
| सोदरोपि=सगोभाई पण. | शक्रः=इंद्र | तुरगः=घोडो. |
| अमित्रः=शत्रु | च्युतः=खस्यो | शीलं=स्वभाव, धंधो |
| स्कन्धः=खंभो | अवमाननम्=अपमान | सख्यं=मैत्री |
| यावत्=ज्यांसुधि | ख्यातः=प्रसिद्ध | |
| | अधमः=हलको | |
| | छिन्द्यात्=फाडीनाखवुं | |

---

## पाठ ६

१ न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम्
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते
२ धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः
पंच यत्र न विद्यन्ते न तत्र दिवसं वसेत्
३ चलत्येकेन पादेन तिष्ठत्यन्येन पंडितः
नापरीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्
४ न कश्चिदपि जानाति किं कस्य श्वो भविष्यति
अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान्
५ अर्थनाशं मनस्तापं गृहे दुश्चरितानि च
वंचनं चापमानं च मतिमान्न प्रकाशयेत्
६ अवृत्तिकं त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत्
त्यजेन्मायाविनं मित्रं धनं प्राणहरं त्यजेत्
७ आपदि मित्रपरीक्षा, शूरपरीक्षा रणांगणे भवति
विनये वंशपरीक्षा, स्त्रियः परीक्षा तु निर्धने पुंसि
८ आरोग्यं विद्वत्ता, सज्जनमैत्री महाकुले जन्म

स्वाधीनताच पुंसां, महदैश्वर्यं विनाप्यर्थैः
९ प्राप्य चलानधिकारान्, शत्रुषु मित्रेषु बन्धुवर्गेषु
नापकृतं नोपकृतं, न सत्कृतं किं कृतं तेन
१० अबला यत्र प्रबला, बालो राजा निरक्षरो मन्त्री
नहि नहि तत्र धनाशा, जीवितुमाशापि दुर्लभा भवति

कोशः

गणः=समुदाय
अग्रतः=आगळ
कार्यैसिद्धे सति=जो कार्य सिद्ध थाय तो
यदि=जो कदाच
मुखरः=आगेवान
अपरीक्ष्य =परीक्षा कर्याविना
आयतनं=स्थान
कश्चिदपि=कोईपण

जानाति=जाणेछे
श्वः=आवतीकाले
अद्यैव=आजेज
करणीयं=करवानुं काम
दुश्चरितं=खराब चाल
वंचनं=ठगाववुं
प्रकाशयेत्=जाहेरकरवुं
अवृत्तिकः=जेमां उपजीविकानुं साधन नथी एवो
उपद्रवः=तकलीफ

मायावी=कपटी
विनयः=नम्रता
पुंसिनिर्धनेसति=पुरुष निर्धन थाय ते वेळाए
चलः=चंचल
अपकृतं=नुकसान कर्युं
अबला=बायडी
पुंसां=पुरुषोनुं

---

## पाठ ७

१ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्
२ केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः
केचिद् ज्ञानावलेपेन केचिन्नष्टैस्तु नाशिताः
३ चिन्तनीया हि विपदामादावेव प्रतिक्रिया:
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे
४ पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम्

अपन्थानं गच्छन्=आडे मार्गे चालतो
सोदरोपि=सगोभाई पण.
अमित्रः=शत्रु
स्कन्धः=खंभो
यावत्=ज्यांसुधि
आरूढः=चढीबेसेलो
शक्रः=इंद्र
च्युतः=खस्यो
अवमाननम्=अपमान
ख्यातः=प्रसिद्ध
अधमः=हलको
छिन्द्यात्=फाडीनाखवुं
संगमनुव्रजन्ति=संगत करछे.
तुरगः=घोडो.
शीलं=स्वभाव, धंधो
सख्यं=मैत्री

## पाठ ६

१ न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम्
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते
२ धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः
पंच यत्र न विद्यन्ते न तत्र दिवसं वसेत्
३ चलत्येकेन पादेन तिष्ठत्यन्येन पंडितः
नापरीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्
४ न कश्चिदपि जानाति किं कस्य श्वो भविष्यति
अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान्
५ अर्थनाशं मनस्तापं गृहे दुश्चरितानि च
वंचनं चापमानं च मतिमान्न प्रकाशयेत्
६ अवृत्तिकं त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत्
त्यजेन्मायाविनं मित्रं धनं प्राणहरं त्यजेत्
७ आपदि मित्रपरीक्षा, शूरपरीक्षा रणांगणे भवति
विनये वंशपरीक्षा, स्त्रियः परीक्षा तु निर्धने पुंसि
८ आरोग्यं विद्वत्ता, सज्जनमैत्री महाकुले जन्म

स्वाधीनताच पुंसां, महदैश्वर्यं विनाप्यर्थैः
९ प्राप्य चलानधिकारान्, शत्रुषु मित्रेषु बन्धुवर्गेषु
नापकृतं नोपकृतं, न सत्कृतं किं कृतं तेन
१० अबला यत्र प्रबला, बालो राजा निरक्षरो मन्त्री
नहि नहि तत्र धनाशा, जीवितुमाशापि दुर्लभा भवति

### कोशः

गणः=समुदाय
अग्रतः=आगळ
कार्येसिद्धे सति=जो कार्य सिद्ध थाय तो
यदि=जो कदाच
मुखरः=आगेवान
अपरीक्ष्य =परीक्षा कऱ्याविना
आयतनं=स्थान
कश्चिदपि=कोईपण

जानाति=जाणेछे
श्वः=आवतीकाले
अद्यैव=आजेज
करणीयं=करवानुं काम
दुश्चरितं=खराब चाल
वंचनं=ठगाववुं
प्रकाशयेत्=जाहेरकरवुं
अवृत्तिकः=जेमां उपजीविकानुं साधन नथी एवो
उपद्रवः=तकलीफ

मायावी=कपटी
विनयः=नम्रता
पुंसिनिर्धनेसति=पुरुष निर्धन थाय ते वेळाए
चलः=चंचल
अपकृतं=नुकसान कर्युं
अवला=वायडी
पुंसां=पुरुषोनुं

---

## पाठ ७

१ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्
२ केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः
केचिद् ज्ञानावलेपेन केचिन्नष्टैस्तु नाशिताः
३ चिन्तनीया हि विपदामादावेव प्रतिक्रियाः
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे
४ पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम्

मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः
५ न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते
अनाहूता न चायान्ति तेनाश्मानोऽपि देवताः
६ उपभोक्तुं न जानाति श्रियं प्राप्यापि मानवः
आकंठं जलमग्नोऽपि श्वा हि लेढ्येव जिह्वया
७ आर्ता देवान् नमस्यन्ति तपः कुर्वन्ति रोगिणः
अधना दातुमिच्छन्ति वृद्धा नारी पतिव्रता
८ एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम्
गतानुगतिको लोको न लोकः पारमार्थिकः
९ क्वचिद्रुष्टाः क्वचित्तुष्टा स्तुष्टा रुष्टा क्षणेक्षणे
अव्यवस्थितचित्तानां प्रसादोऽपि भयंकरः
१० वयसि गते कः कामविकारः, शुष्के नीरे कः कासारः
क्षीणे वित्ते कः परिवारः, ज्ञाते तत्त्वे कः संसारः

कोशः

जनपदः=देश
अज्ञानतः=अज्ञानथी
प्रमादतः=भूलथी
अवलेपः=गर्व
नष्टः=बगडी गयेलो
नाशिताः=बगाड्या.
चिन्तनीयाः=गोती राखवां
आदावेव=पेहेलेथीज
प्रतिक्रिया=इलाज
युक्तं=ठीक

गृहे प्रदीप्ते=घर सळगे त्यारे
जपन्=जप करतो
जाग्रत्=जागतो
अनाहूताः=न बोलावतां
आकंठं=गळालगण
मग्नः=डुबेलो
श्वा=कुतरो
लेढि=चाटेछे. ( लिह् )
आर्तः=दुखी

नमस्यति=नमस्कार करेछे
गर्हितम्=खराब काम
पारमार्थिकः=साचुं जाणनारो
प्रसादः=मेहेरबानी,
वयसि गते सति=उमर नीकळी गई एटले.
नीरं=पाणी
कासारः=सरोवर
परिवारः=भाईबंध

## पाठ ८

१ निर्विषेणापि सर्पेण कर्तव्या महती फणा
विषमस्तु नचाप्यस्तु खटाटोपो भयंकरः
२ एक एव पदार्थस्तु त्रिधा भवति वीक्षितः
कामिनी कुणपं मांसं कामिभिर्योगिभिः श्वभिः
३ शैले शैले न माणिक्यं मौक्तिकं न गजे गजे
साधवो नहि सर्वत्र चन्दनं न वने वने
४ या लोभाद्या परद्रोहात् यः पात्रे यः परार्थके
प्रीतिर्लक्ष्मीर्व्ययः क्लेशः सा किं सा किं स किं स किम्
५ यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्
भस्मीभूतस्य देहस्य पुनरागमनं कुतः
६ यश्च मूढतमो लोके यश्च बुद्धेः परं गतः
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः
७ साक्षरा विपरीताश्चेद्राक्षसा एव केवलम्
सरसो विपरीतश्चेत् सरसत्वं न मुंचति
८ दरिद्रता धीरतया विराजते
कुरूपता शीलगुणैर्विराजते
कुभोजनं चोष्णतया विराजते
कुवस्त्रता शुभ्रतया विराजते
९ यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षणच्छेदनतापताडनैः
तथा चतुर्भिः पुरुषः परीक्ष्यते

श्रुतेन शीलेन गुणेन कर्मणा

१० मात्रा समं नास्ति शरीरपोषणं
चिन्तासमं नास्ति शरीरशोषणम्
भार्यासमं नास्ति शरीरतोषणं
विद्यासमं नास्ति शरीरभूषणम्.

निर्विषः=जेहेरविनानो
अस्तु न चाप्यस्तु=होय के न होय भले
त्रिधा=त्रण प्रकारनो
वीक्षितः=जोवामां आवेलो
कुणपं=मडदुं
श्वभिः=कूतरावडे
शैलः=पहाड
परार्थके=पारकाने माटे

व्ययः=खरच
भस्मीभूतः=खाखथयेलो
मूढतमः=तदन मूरख
बुद्धेःपरंगतः=बुद्धी करतां पर जे परमात्मा तेने पोहोंचेलो.
सुखमेधते=सुखी होय छे

क्लिश्यति=दुःखी थायछे
अन्तरितः=वचलो
साक्षरः=विद्वान्
सरसः=प्रेमी
शुभ्रता=स्वच्छता,
कनकं=सोनुं
निघर्षणं=घसवुं
श्रुतं=शास्त्र
समं=जेवुं, सरखुं

---

## पाठ ९

१ सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम्
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्

२ माता यदि विषं दद्यात् विक्रीणाति पिता सुतं
राजा हरति सर्वस्वं तत्र का परिदेवना

३ धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते
अजागलस्तनस्येव तस्य जन्म निरर्थकम्

४ मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्

आत्मवत्सर्वभूतेषु यः पश्यति स पश्यति

५ दिवा पश्यति नोलूकः काको नक्तं न पश्यति
अपूर्वः कोऽपि कामान्धो दिवा नक्तं न पश्यति

६ यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्

७ पिण्डे पिण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः
जातौ जातौ नवाचारा भिन्ना वाणी मुखे मुखे

८ मर्कटस्य सुरापानं तत्र वृश्चिकदंशनम्
तन्मध्ये भूतसंचारो यद्वा तद्वा भविष्यति

९ पुस्तकस्था तु या विद्या परहस्तगतं धनं
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्

१० सहसा विदधीत न क्रिया, मविवेकः परमापदां पदम्
वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव संपदः

## कोशः

विक्रीणाति=वेंचे छे
सर्वस्वं=बधी मिलकत
तत्र का परिदेवना= तेमां शानो शोक.
अजागलः=बकरीनुंगळुं
परदाराः=पारकानी स्त्री
लोष्टवत्=ढेफानी पेठे
दिवा=दहाडे
नक्तं=रात्रे
उलूकः=घुवड
कोऽपि अपूर्वः=कांई अजायब एवो
धनसंपत्तिः=जेटलुं जोईये तेटलुं धन
प्रभुत्वं=उपरीपणुं
अविवेकिता=अविचारीपणुं
यत्र चतुष्टयं तत्र किमु=ज्यां चारे होय त्यां शुं कहेवुं
वृश्चिकः=वींछी.
कार्यकाले समुत्पन्ने= काम पडे त्यारे.
सहसा=अविचारथी
न विदधीत=न करवुं
परमापदः=मोहोटी विपत्तिओ
पदं=स्थान
वृणते=वरे छे (वृ)
विमृश्यकारी=विचार करी काम करवावालो

## पाठ १०

१ ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः

२ विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषुच
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्यच

३ अगाधजलसंचारी न गर्वं याति रोहितः
अंगुष्ठोदकमात्रेण शफरी फर्फरायते

४ नवं वस्त्रं नवं छत्रं नव्या स्त्री नूतनं गृहं
सर्वन्तु नूतनं शस्तं सेवकान्ने पुरातने

५ नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि
कुशकंटकविद्धोपि प्राप्तकालो न जीवति

६ कवयः किं न पश्यन्ति किं न भक्षन्ति वायसाः
मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति योषितः

७ लालयेत्पंच वर्षाणि दश वर्षाणि ताडयेत्
प्राप्तेतु षोडशे वर्षे पुत्रे मित्रवदाचरेत्

८ कर्तव्यमेव कर्तव्यं प्राणैः कंठगतैरपि
अकर्तव्यं न कर्तव्यं प्राणैः कंठगतैरपि

९ गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः

१० शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहतास्तु नितरां सुहता भवन्ति
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलं च विभवं च यशश्च हन्ति.

## कोशः

ऋणं=करज
व्यभिचारिणी=खराब चालनी
अगाधं=घणुज ऊंडुं
संचारी=संचार करवावाळो
गर्वं याति=गर्वने पामेछे
अंगुष्टोदकमात्रेण=केवळ अंगुठाभर पाणी मळ्युं एटले
नूतनं=नवुं
शस्तं=वखणायेलुं
पुरातनं=जुनुं
अकाले=वखत आव्याविना
विद्धः=विंधायेलो
शरशतैः=सेंकडो बाणोवडे
कुशः=दरभ
मद्यपः=दारुडिओ
प्राप्ते तु षोडशेवर्षे=सोळमुं वर्ष बेठुं एटले
प्राणैःकंठगतैरपि=प्राण नीकळी जाय तोए
पिकः=कोयल
प्रज्ञाहताः=जेमनी बुद्धि मारीनांखवामां आवी एवा
नितरां=तदन
सुहतः=सारीपेठे हणायेलो
हन्ति=मारीनांखेछे.

---

## पाठ ११

१ अनर्घमपि माणिक्यं हेमाश्रयमपेक्षते
निराश्रया न शोभन्ते पण्डितावनितालताः
२ लालने वहवो दोपास्ताडने बहवो गुणाः
तस्मात्पुत्रंच शिष्यंच ताडयेन्नतु लालयेत्
३ वक्तारः किं करिष्यन्ति श्रोता यत्र न विद्यते
नग्नक्षपणके देशे रजकः किं करिष्यति

४ कुलीनैः सह संपर्कं पण्डितैः सह मित्रताम्
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति
५ कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्
को विदेशः सुविद्यानां कः परः प्रियवादिनाम्
६ आपदां कथितः पन्था इन्द्रियाणामसंयमः
तज्जयः संपदां मार्गो येनेष्टं तेन गम्यताम्
७ असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः
सलज्जा गणिका नष्टा निर्लज्जा च कुलांगना
८ प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति
९ शोकस्थानसहस्राणि भयस्थानशतानि च
दिवसे दिवसे मूढमाविशन्ति न पंडितम्
१० कस्यापि कोप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति नहि सर्वविदस्तु सर्वे
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्ल्यपि च पुष्पफलैरुपेता.

## कोशः

अनर्घ=अमूल्य एवुं
हेम=सोनुं
अपेक्षते=अपेक्षा राखे छे
रजकः=धोबी
संपर्कः=सोबत
मेलः=मळतापणुं
कुर्वाणः=करवावाळो

व्यवसायी=उद्योगी
कथितः=कह्यो
गम्यताम्=जाओ
इष्टं=ठीक लागे
द्विजाः=ब्राह्मणो
महीभुक्=राजा
अर्जितं=मेळव्युं

अतिशयः=विशेष गुण
ख्यातिः=प्रसिद्धि
सर्वविद्=सघळुं जाणवावाळो.
उपेता=युक्त.

## पाठ १२

१ काव्यशास्त्रविनोदेन कालो गच्छति धीमतां
व्यसनेन च मूर्खाणां निद्रया कलहेन वा
२ काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः
प्राप्ते वसन्तसमये काकः काकः पिकः पिकः
३ हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः
नीरक्षीरपरीक्षायां हंसो हंसो बको बकः
४ येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति
५ यूयं वयं वयं यूयमित्यासीन्मतिरावयोः
किं जातमधुना येन यूयं यूयं वयं वयम्
६ यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत्
यद्यदात्मवशं तु स्यात् तत्तत्सेवेत यत्नतः
७ कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः
८ क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्
अपराधिषु सत्वेषु नृपाणां सैव दूषणम्
९ सेवितव्यो महान् वृक्षः फलच्छायासमन्वितः
दैवाद्यदि फलं नास्ति छाया केन निवार्यते
१० हंसो न भाति बलिभोजनवृन्दमध्ये
गोमायुमण्डलगतो न विभाति सिंहः
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान्न भाति पुरुषेषु निरक्षरेषु

## कोशः

विनोदः=रमूज
धीमान्=बुद्धिमान्
नीरं=पाणी
क्षीरं=दूध
शुक्लीकृताः=धोळा बनाव्या
हरितीकृताः=लीला बनाव्या
चित्रिताः=चित्रविचित्र रंगना बनाव्या
वृत्तिं विधास्यति=उपजीविकानी तजवीज करशे
अधुना=हमणा
यत्नतः=मेहेनतथी
व्यलीकं=खराब, बूरूं
वल्लभः=वहालो
सत्वं=प्राणी
समन्वितः=युक्त
वलिभोजनः=कागडो
वृन्दम् समुदाय
गोमायुः=शियाळ
खरः=गधेडो
यूथं=टोळुं
जात्यः=उत्तम जातीनो
तुरग=घोडो

---

## पाठ १३

१ मित्रद्रोही कृतघ्नश्च तथा विश्वासघातकः
त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरौ
२ जनिता चोपनेता च यश्च विद्यां प्रयच्छति
अन्नदाता भयत्राता पंचैते पितरः स्मृताः
३ कन्या वरयते रूपं माता वित्तं पिता श्रुतं
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः
४ विद्यया विनयावाप्तिः साचेदविनयावहा
किं कुर्मः कं प्रति ब्रूमो गरदायां स्वमातरि
५ द्विःशरं नाभिसंधत्ते द्विः स्थापयति नाश्रितान्
द्विर्ददाति न चार्थिभ्यो रामो द्विर्नैव भाषते
६ धनाशा जीविताशा च गुर्वी प्राणभृतां सदा
वृद्धस्य तरुणीभार्या प्राणेभ्योऽपि गरीयसी

७ उपकर्तुं यथा स्वल्पः समर्थो न तथा महान्
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः
८ नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्
९ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः
येषां हृदिस्थो भगवान् मंगलायतनं हरिः
१० रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर

## कोशः

कृतघ्नः=करेला उपकारने भुलीजवावाळो
दिवाकरः=सूर्य
जनिता=जन्म आपनार
उपनेता=उपनयन करनार
वरयते=पसंत करे छे
आवहा=आपवावाळी
ब्रूमः=बोलियें

स्वमातरि गरदायां-सत्यां=पोतानी मा जेहेर आपवा लागे त्यारे
अभिसंधत्ते=जोडे छे
द्विः=बे वखते
गरीयसी=वधारे मोहोटी
हृदिस्थः=हैय्यामां रहेवावाळो

आयतनं=स्थान
अभिहता=मारी नांखी
चमूः=सेना
परायणं=उत्तम एवुं प्राप्तव्यस्थान
लयः=नाश
मणिः=रत्न

---

## पाठ १४

१ उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः
नहि सिंहस्य सुप्तस्य प्रविशन्ति मुखे गजाः

२ उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत्
३ आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति
४ अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम्
५ विहाय पौरुषं यो हि दैवमेवावलंबते
प्रासादसिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः
६ यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्
एवं पुरुषकारेण विना दैवं न सिध्यति
७ योजनानां सहस्रन्तु शनैर्गच्छेत्पिपीलिका
अगच्छन् वैनतेयोपि पदमेकं न गच्छति
८ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः

---

९ गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सतां
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः
१० गुणवज्जनसंसर्गाद्याति स्वल्पोऽपि गौरवम्
पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते
११ गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः
वासुदेवं नमस्यन्ति वसुदेवं न वै जनाः
१२ यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्
नहि कस्तूरिकामोदः शपथेन निवार्यते

१३ गुणैर्गौरवमायाति नोच्चैरासनमास्थितः
प्रासादशिखरारूढः काकः किं गरुडायते
१४ परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत्
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः
१५ अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव
१६ कौशेयं कृमिजं सुवर्णमुपलादिन्दीवरं गोमयात्
पंकात्तामरसं शशांक उदधेर्गोपित्ततो रोचना
काष्ठादग्निरहेः फणादपि मणिर्दूर्वापि गोरोमतः
प्राकाश्यं स्वगुणोदयेन गुणिनो यास्यन्ति किं जन्मना ?

## कोशः

सुप्तः=सूतेलो
सहायकृत्=मदतगार
आलस्यम्=आळस
कुर्वाणः=करवावाळो
अवसीदति=दुःखीथाय
विहाय=तजीने
पौरुषं=प्रयत्न
अवलंबते=पकडी बेसेछे
प्रासादः=मेहेल
मूर्ध्नि=माथा उपर
पुरुषकारः=उद्योग
पिपीलिका=कीडी
वैनतेयः=गरुड
उपैति=प्राप्त थायछे
देयम्=आपवुं
कापुरुषः=खराब माणस

यत्ने कृते=यत्न कर्‍यो छतां
आघ्राय=सुंघीने
षट्पदाः=भमराओ
संसर्गः=सहवास
गौरवम्=मोटाई
अनुषंगः=सहवास
पुंसाम्=पुरुषोनीपासे
विकसति=खीलेछे
आमोदः=सुवास
आस्थितः=बेसेलो
प्रोक्तः=कहेवामां आवेलो
प्रख्यापितः=जाहेर करेलो
मितः=मापेलो, थोडो

महितः=पूज्य
कौशेयम्=रेसम
कृमिः=कीडो
उपलः=पथ्थर
इन्दीवरं=कमळ
गोमयं=छाण
तामरसम्=रातुं कमळ
शशांकः=चन्द्र
उदधिः=दरीयो
गोरोमतः=गायना वाळोथी
प्राकाश्यम्=प्रसिद्धि
जन्मना किम्=जन्मनुं शुं काम छे

## पाठ १५

१ महानुभावसंसर्गः कस्य नोन्नतिकारकः
रथ्याम्बु जाह्नवीसंगात् त्रिदशैरपि वन्द्यते

२ हीयते हि मतिस्तात हीनैः सह समागमात्
समैश्च समतामेति विशिष्टैश्च विशिष्टताम्

३ संगः सर्वात्मना हेयः सचेत्त्यक्तुं न शक्यते
स सद्भिः सह कर्तव्यः साधुसंगो हि भेजषम्

४ गवाशनानां स शृणोति वाक्यं, अहंहि राजन् वचनं मुनीनाम्
न चास्य दोपो नच मद्गुणोवा, संसर्गजा दोषगुणा भवन्ति

५ असज्जनः सज्जनसंगिसंगात्, करोति दुःसाध्यमपीह साध्यम्
पुष्पाश्रयाच्छंभुशिरोऽधिरूढा, पिपीलिका चुंबति चन्द्रबिंबं

६ जाड्यं धियो हरति सिंचति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सगंतिः कथय किं न करोति पुंसाम्

७ संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो देहिनाम्

---

८ परोपकारशून्यस्य धिङ्मनुष्यस्य जीवितम्
धन्यास्ते पशवो येषां चर्माप्युपकरोति हि.

९ आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः
परं परोपकारार्थं यो जीवति स जीवति

१० उपकर्तुं यथा स्वल्पः समर्थो न तथा महान्
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः
११ श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्नतु कंकणेन
विभाति कायः करुणापराणां, परोपकारैर्नतु चंदनेन
१२ परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम्
१३ यो नात्मजे नच गुरौ नच बन्धुवर्गे
दीने दयां न कुरुते नच भृत्यवर्गे
किं तस्य जीवितफलं हि मनुष्यलोके
काकोपि जीवति चिराय बलिं च भुंक्ते

## कोशः

अनुभावः=सामर्थ्य
रथ्याम्बु=गटरनुं पाणी
जाह्नवी=गंगा
त्रिदशाः=देवो
हीयते=ओछी थाय छे
एति=पामे छे
सर्वात्मना=बधी रीते
हेयः=तजवो
भेषजम्=ओसड
गवाशनः=ढेड
शृणोति=सांभळे छे
अधिरूढा=चढी बेसेली

जाड्यम्=जडपणुं
दिशति=देखाडे छे
अपाकरोति=दूर करेछे
तनोति=फेलावे छे
अयः=लोढुं
मुक्ताकारतया=मोतीना आकारथी
नलिनी=कमलिनी
राजते=शोभे छे
शुक्तिः=छींप
देही=प्राणी
शून्यः=रहित

धिक्=धिःकार
उपकरोति=कामे आवे छे
प्रायः=घणुंकरी
श्रोत्रम्=कान
श्रुतम्=शास्त्र
आत्मजः=दीकरो
वर्गः=समुदाय
चिराय=लांबा बखत लगण
भुंक्ते=खाय छे

## पाठ १६

१ संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम्
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्

२ अकृत्वा परसंतापं अगत्वा खलमंदिरम्
अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु

३ यो मे गर्भगतस्यापि वृत्तिं कल्पितवान् प्रभुः
शेषवृत्तिविधानाय स किं सुप्तोऽथवा मृतः

४ पंचमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे
अनृणी चाप्रवासी च स वारिचर मोदते

५ सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसं
उपानद्गूढपादस्य ननु चर्मावृतेव भूः

६ सर्पाः पिबन्ति पवनं नच दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालम्
संतोष एव पुरुषस्य परं निधानम्

---

७ वलिभिर्मुखमाक्रान्तं-पलितैरंकितं शिरः
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते

८ आशा नाम मनुष्याणां काचिदाश्चर्यशृंखला
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत्

९ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम्
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलंबितम्

१० आशाया ये दासास्ते दासाः सन्ति सर्वलोकस्य
आशा येषां दासी तेषां दासायते लोकः

११ अंगं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम्
वृद्धो याति गृहीत्वा दण्डं तदपि न मुंचत्याशा पिण्डम्
१२ भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम्
वस्त्रं सुजीर्णशतखण्डमयी च कंथा
हाहा तथापि विषयान् न जहाति चेतः
१३ उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवः
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संसेविताः
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुंच माम्

कोशः

इतश्चेतश्च=अहियां ने त्यां
अक्लेशयित्वा=तकलीफ न आपतां
कल्पितवान्=बनावी
विधानम्=करवुं
अहनि=दहाडे
वारिचरः=पाणीमां फरवावाळो
उपानद्=जोडो
गूढः=ढंकायेलो
आवृता=ढांकेली
चर्म=चांवडुं
क्षपयति=गाळे छे
निधानम्=दाटेलुं धन
वलिभिः=करचळीयोवडे
आक्रान्तम्=घेरायुं
पलितैः=धोळा वाळोवडे
अंकितं=निसानी करी
गात्रं=अवयव
शिथिलायंते=ढीलुं थाय छे
नाम=एटले
शृंखला=बेडी
अनुष्ठितम्=कर्युं
पृष्ठतः=पाछळ, कोरे,
नैराश्यं=वैराग्य
विहीनं=रहित
अशनं=खोराक
नीरसं=लुखुं
परिजनः=चाकरमाणस
निजदेहमात्रं=केवल पोतानुं शरीर
सुजीर्ण=घणुंज जूनुं
शतखण्डमयी=शेंकडो थीगडांवाळी
जहाति=तजे छे
उत्खातं=खोद्युं
निधिः=दाटेलुं धन
क्षितितलं=जमीन
ध्मातः=फूंक्यो
निस्तीर्ण=तरवामां आव्यो
संसेविताः=सेवाया
आराधनं=उपासना
नीता=गाळी
काणवराटकः=काणी कोडी

## पाठ १७

१ अनुकूले विधौ देयं यतः पूरयिता हरिः
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति

२ यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि

३ लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया
दातापि विसृजत्यर्थं तयैव ननु शंकया

४ बोधयन्ति न याचन्ते भिक्षाद्वारा गृहे गृहे
दीयतां दीयतां नित्यमदातुः फलमीदृशम्

५ शतेषु जायते शूरः सहस्रेषु च पंडितः
वक्ता दशसहस्रेषु दाता भवति वा न वा

६ दानेन भूतानि वशीभवन्ति, दानेन वैराण्यपि यान्ति नाशम्
परोपि बन्धुत्वमुपैति दानै, र्दानं हि सर्वव्यसनानि हन्ति

---

७ वेपथुर्मलिनं वक्त्रं दीना वाक् गद्गदः स्वरः
मरणे यानि चिह्नानि तानि चिह्नानि याचके

८ तृणादपि लघुस्तूलः तूलादपि च याचकः
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति

९ दारिद्र्यस्य परा मूर्तिर्याञ्चा न द्रविणाल्पता
अपि कौपीनवान् शंभुस्तथापि परमेश्वरः

१० काक आह्वयते काकान् याचको न तु याचकान्
काकयाचकयोर्मध्ये वरं काको न याचकः

११ पंगो धन्यस्त्वमसि न गृहं यासि योर्थी परेषाम्
धन्योऽन्ध त्वं धनमदवतां नेक्षसे यन्मुखानि

श्लाघ्यो मूक त्वमपि कृपणं स्तौपि नार्थाशया यः
स्तोतव्यस्त्वं बधिर न गिरं यः खलानां शृणोपि.

कोशः

| | | |
|---|---|---|
| विधिः=नशीब | वक्त्रम्=मोढुं | यत्=जे कारणथी |
| पूरयिता=भरपूर कर-नार | तूलः=रू, कापुस | श्लाघ्यः=वखाणवा-लायक |
| विशिष्टः=श्रेष्ठ | प्रार्थयेत्=कदाच मांगे | स्तौति=स्तुति करे छे |
| अश्नाति=खायछे | परा=उंची | गिरं=वाणीने |
| विसृजति=छोडे छे | द्रविणम्=धन | शृणोति=सांभळे छे |
| उपैति=पामे छे | कौपीनम्=लंगोट | |
| वेपथुः=कंप | आव्हयते=बोलावे छे | |
| | अर्थी=याचक | |

---

## पाठ १८

१ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः
यस्यार्थाः स पुमांल्लोके यस्यार्थाः सहि पंडितः
२ वयोवृद्धा स्तपोवृद्धा ये च वृद्धा बहुश्रुताः
ते सर्वे धनवृद्धानां द्वारि तिष्ठन्ति किंकराः
३ स्त्रीरूपं मोहकं पुंसो यून एव भवेत्क्षणम्
कनकं स्त्रीबालवृद्धषंढानामपि सर्वदा
४ यस्यास्ति वित्तं स नरः कुलीनः,स पंडितःस श्रुतवान् गुणज्ञः
स एव वक्ता स च दर्शनीयः,सर्वे गुणाः कांचनमाश्रयन्ते
५ त्यजन्ति मित्राणि धनैर्विहीनं, पुत्राश्च दाराश्च सुहृद्गणाश्च
तमर्थवन्तं पुनराश्रयन्ति, अर्थो हि लोके पुरुषस्य बन्धुः
६ बुभुक्षितैर्व्याकरणं न भुज्यते,पिपासितैः काव्यरसो न पीयते
नच्छन्दसा केनचिदुद्धृतंकुलं, हिरण्यमेवार्जयनिष्फलागुणाः

७ धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरंति
धनेभ्यः परो बांधवो नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम्
८ माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते
भृत्यः कुप्यति नानुगच्छति सुतः कन्ता नचालिंगते
अर्थप्रार्थनशंकया न कुरुते संभाषणं वै सुहृत्
तस्माद् द्रव्यमुपार्जयस्व सुमते द्रव्येण सर्वे वशाः

---

९ हे दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन
१० अंवा तुष्यति न मया, न स्नुषया सापि नांवया नमया
अहमपि नतया न तया, वद राजन् कस्य दोषोऽयम्
११ अहो नु कष्टं सततं प्रवासः, ततोतिकष्टः परगेहवासः
कष्टाधिका नीचजनस्य सेवा, ततोऽतिकष्टा धनहीनता च
१२ दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैर्भूषितम्
दग्धा वायुसुतेन रावणपुरी लंका पुनः स्वर्णभूः
दग्धः पंचशरः पिनाकपतिना तेनाप्ययुक्तं कृतं
दारिद्र्यं जनतापकारकमिदं केनापि दग्धं नहि

कोशः

| | | |
|---|---|---|
| द्वारि=बारणे | डयुं | गेहं=घर |
| यूनः=जुवानने | अर्जय=कमाव | द्रुमः=झाड |
| पंडः=नपुंसक | अभिनन्दति=वखाणेछे | स्वर्णभूः=सोनानी |
| बुभुक्षितः=भूख्यो | अनुगच्छति=मानेछे | पंचशरः=काम, मदन |
| पिपासितः=तरसीयो | प्रार्थनं=मागवुं | पिनाकपतिः=शिवजी |
| छन्दः=वेद | अंवा=मा | अयुक्तं=खोटुं |
| उद्धृतं=उन्नतीने पमा- | स्नुषा=वहु | |

---

## पाठ १९

१ परोपदेशे पांडित्यं सर्वेषां सुकरं नृणाम्
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः

२ यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः
चित्ते वाचि क्रियायांच साधूनामेकरूपता

३ उपकारिषु यः साधुः साधुत्वे तस्य को गुणः
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते

४ शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः
नीचो वदति न कुरुते, वदति न साधुः करोत्येव

५ अद्यापि दुर्निवारं, स्तुतिकन्या भजति चैव कौमारम्
सद्भ्यो न रोचते सा, सन्तोप्यस्यै न रोचन्ते

६ उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः
विकसति यदि पद्मं पर्वताग्रे शिलायाम्
न भवति पुनरुक्तं भाषितं सज्जनानाम्

७ घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्
छिन्नं छिन्नं पुनरपि पुनः स्वादुचैवेक्षुकाण्डम्
दग्धं दग्धं पुनरपि पुनः कांचनं कान्तवर्णम्
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम्

८ विजेतव्या लंका चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः

तथाप्येको रामः सकलमवधीद्राक्षसकुलम्
क्रियासिद्धिः सत्वे भवति महतां नोपकरणे
९ दृश्यन्ते भुवि भूरि निम्बतरवः कुत्रापि ते चन्दनाः
पाषाणैः परिपूरिता वसुमती वज्रो मणिर्दुर्लभः
श्रूयन्ते करटारवाश्च सततं चैत्रे कुहूकूजितम्
तन्मन्ये खलसंकुलं जगदिदं द्वित्राः क्षितौ सज्जनाः

---

१० खलः सर्षपमात्राणि परच्छिद्राणि पश्यति
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति
११ उपकारोऽपि नीचानामपकाराय जायते
पयःपानं भुजंगानां केवलं विषवर्धनम्
१२ मृगमीनसज्जनानां, तृणजलसंतोषविहितवृत्तीनाम्
लुब्धकधीवरपिशुना, निष्कारणवैरिणो जगति
१३ विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय
खलस्य साधोर्विपरीतमेतत्, ज्ञानाय दानायच रक्षणाय
१४ जाड्यं ह्रीमति गण्यते व्रतरुचौ दंभः शुचौ कैतवम्
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नांकितः
१५ एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे

१६ कस्त्वं भद्र खेलेश्वरोऽहमिह किं घोरे वने स्थीयते
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया
कस्मात्कष्टमिदं त्वया व्यवसितं मद्देहमांसाशिनः
प्रत्युत्पन्ननृमांसभक्षणधियः ते घ्नन्तु लोकानिति

१७ भिक्षो कन्था श्लथा ते नहि
शफरिवधे जाल, मश्नासि मत्स्यान् ।
ते वै मद्योपदंशाः, पिबसि मधु,
समं वेश्यया, यासि वेश्याम् ? ॥
दत्वांघ्रिं मूर्ध्न्यरीणां, तव किमु
रिपवो, भित्तिभेत्तासि येषाम् ।
चोरोऽसि ? द्यूत हेतोः, त्वयि
सकलमिदं नास्ति नष्टे विचारः ॥

## कोशः

सुकरं=सेहेलुं
नृणां=माणसोने
स्वीयं=पोतानुं
अनुष्ठानं=आचरण
एकरूपता=ऐक्य
निस्वनः=शब्दरहित
दुर्निवारं=निवारण करी न शकाय एवुं
भजति=पाळेछे
कौमारं=कुवारापणुं
रोचते=पसंत पडेछे
यदि=जोके

अवधीत्=मार्युं
उपकरणं=साधन
भूरि=घणा
कुत्रापि=जूज
पाषाणः=पथ्थर
परिपूरिता=भरपूर
वसुमती=पृथ्वी
करटः=कागडो
आरवः=शब्द
कूजितं=शब्द
संकुलं=व्याप्त थयेलुं
द्वित्राः=बेत्रण

अवलिप्तता=गर्विष्ठपणुं
मुखरता=वाचालपणुं
स्थिरः=ठावको
को नाम ?=कयो भला
घटकः=करवावाळो
उद्यमभृत्=उद्योगी
निघ्नन्ति=बगाडेछे
जानीमहे=अमे जाणियें छियें
भद्र=भाई
शार्दूलः=वाघ

पुनरुक्तं नभवति=वदलातुं नथी
घृष्टं=घसेलुं
चारुः=सुन्दर
स्वादु=मीठुं
इक्षुः=शेरडी
कांचनं=सोनुं
कान्तः=सुन्दर
विकृतिः=फरक
विजेतव्या=जीतवानी
तरणीयः=तरी जवानो
विपक्षः=शत्रु
रणभुवि=लढाईमां

सर्षपमात्रं=राईजेटलुं
मीनः=माछलो
विहित=करेलुं
लुब्धकः=पाराधी
धीवरः=मच्छीमार
पिशुनः=चुगलीखोर
ह्रीमान्=शरमाळ
शुचिः=शुद्ध
कैतवं=धूर्तपणुं
निर्घृणता=निर्दयपणुं
विमतिता=मूर्खपणुं
प्रियालापी=मीठुं बोलनार

खाद्यः=खाई नांखवो
व्यवसितं=कर्युं
मांसाशी=मांस खावावाळो
घ्नन्तु=मारीनांखे
श्लथा=ढीली
शफरी=माछली
उपदंश=चटणी विगेरे
मधु=दारु
अंघ्रिः=पग
भेत्ता=फोडवावाळो
द्यूतहेतोः=जुगारनेवास्ते

---

## पाठ २०

१ अलंकरोति हि जरा राजामात्यभिषग्यतीन्
विडंबयति पण्यस्त्री मल्लगायकसेवकान्
२ इयत्यामपि सामग्र्यां सुकृतं न कृतं त्वया
इतीव कुपितो दंतानन्तकः पातयत्ययम्
३ वदनं दशनविहीनं, वाचो न परिस्फुटा गता शक्तिः
अव्यक्तेन्द्रियशक्तिः, पुनरपि बाल्यं कृतं जरया
४ कृतान्तस्य दूती जरा कर्णमूले
समागत्य वक्तीति लोकाः शृणुध्वम्
परस्त्रीपरद्रव्यवांछां त्यजध्वम्
भजध्वं रमानाथपादारविन्दम्

५ गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिः
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रंच लालायते
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते

---

६ अनुचितकर्मारंभः, स्वजनविरोधो बलीयसा स्पर्धा
प्रमदाजनविश्वासो, मृत्युद्वाराणि चत्वारि
७ रोगी चिरप्रवासी, परान्नभोजी परावसथशायी
यज्जीवति तन्मरणं, यन्मरणं सोऽस्य विश्रामः
८ आलस्यं स्त्रीसेवा, सरोगता जन्मभूमिवात्सल्यम्
सन्तोषो भीरुत्वं, षड् व्याघाता महत्वस्य.
९ गन्धः सुवर्णे फलमिक्षुदण्डे
नाकारि पुष्पं खलु चन्दनेषु
विद्वान् धनाढ्यो नतुदीर्घजीवी
धातुः पुरा कोऽपि न बुद्धिदोऽभूत्
१० दारेषु किंचित्स्वजनेषु किंचित्
गोप्यं वयस्येषु सुतेषु किंचित्
युक्तं नवा युक्तमिदं विचिन्त्य
वदेद्विपश्चिन्महतोऽनुरोधात्
११ वैद्या वदन्ति कफपित्तमरुद्विकारान्
ज्योतिर्विदो ग्रहगतिं परिवर्तयन्ति
भूताभिषंग इति भूतविदो वदन्ति
प्रारब्धकर्म बलवन्मुनयो वदन्ति
१२ दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्

ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात्
मैत्रीचाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम्
१३ पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः
अक्षैश्चापि युधिष्ठिरेण रमता प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते

कोशः

अमात्यः=प्रधान
भिषक्=वैद्य
पण्यस्त्री=वेश्या
इयती=एटलीवधी
इतीव=जाणे के एम
ज न होय
अन्तकः=यम
परिस्फुटा=खुली
शृणुध्वम्=सांभळो
अरविन्दं=कमळ

आवलिः=हार
उचितं=योग्य
वलीयान्=बलिष्ठ
आवसथः=घर
वात्सल्यं=ममता
भीरुः=बीकण
व्याघातः=अटकाव
नाकारि=न कर्युं
वयस्यः=दोस्तार
दौर्मन्त्र्यात्=खराव मं-
त्री होवाथी

अवेक्षणं=नजर राख-
वी ते
प्रणयः=प्रेम
अनयः=अनीति
लक्षितः=ध्यानमांलीधो
अक्षाः=पासा
प्रत्यासन्ना=पासे आ-
वेली

---

## पाठ २१

१ यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति
२ तादृशी जायते बुद्धिर्व्यवसायोपि तादृशः
सहायास्तादृशाश्चैव यादृशी भवितव्यता

३ अवश्यंभाविभावानां प्रतीकारो भवेद्यदि
तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः
४ वने जले शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि
५ सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा
अहं करोमीति वृथाभिमानः, स्वकर्मसूत्रग्रथितो हि लोकः
६ भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य
कृत्स्नाच भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य
७ नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव नच यत्नकृतापि सेवा
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः
८ यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनम्
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाऽधिकम्
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्
९ भग्नाशस्य करंडपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेवहि नृणां वृद्धौ क्षये कारणम्

---

१० नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी
गुणीच गुणरागीच विरलः सरलो जनः

११ उदये सविता रक्तो रक्तश्चास्तमये तथा
संपत्तौ च विपत्तौ च महतामेकरूपता

१२ आरभन्तेल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च
महारंभाः कृतधियः तिष्ठन्ति च निराकुलाः

१३ इक्षोरग्रात् क्रमशः, पर्वणि पर्वणि यथा रसविशेषः
तद्वत्सज्जनमैत्री, विपरीतानां च विपरीता

१४ वनेऽपि सिंहा मृगमांसभक्षिणो
बुभुक्षिता नैव तृणं चरन्ति
एवं कुलीना व्यसनाभिभूता
न नीचकर्माणि समाचरन्ति

१५ पिबन्ति नद्यः स्वयमेव नांभः
स्वयं न खादन्ति फलानि वृक्षाः
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः

१६ दाता न दापयति दापयिता न दत्ते
यो दानदापनपरो मधुरं न वक्ति
दानं च दापनमथो मधुरा च वाणी
त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति

१७ आरभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति

## कोशः

तादृशी=तेवी
भवितव्यता=नशीब
व्यवसायः=उद्योग
प्रतीकारः=अटकाव
अवश्यंभावि-
भावाः=जरूर बनवा-
वाळा बनावो
अर्णवः=दरियो
ग्रथितः=बन्धायलो
भीमं=भयंकर
उपयाति=पामेछे
कृत्स्ना=आखी
निजं=पोतानुं
भालं=कपाळ

स्तोकं=थोडुं
मरुस्थलं=मारवाड
नितरां=खूब
कृपणा=दीन, हलकी
वृत्तिः=वर्ताव
माकृथाः=कर मा
तुल्यं=सरखुं
गृह्णाति=ग्रहण करेछे
आखुः=उंदर
विवरं=दर
भोगी=साप
पिशितं=मांस
रागी=प्रेम राखवावाळो

अस्तमयः=सायंकाळ
कामं=तदन
आरंभः=काम
कृतधीः=पंडित
भक्षी=खावावाळो
अभिभूतः=जीतायेलो
वारिवाहः=मेघ
दापयति=देवरावेछे
दत्ते=आपेछे
वक्ति=बोलेछे
विहताः=अटकावेला
विरमन्ति=ठंडापडेछे
प्रतिहन्यमानाः=अट-
कावेला

---

## पाठ २२

१ एकेनापि सुपुत्रेण सिंही स्वपिति निर्भया
सहैव दशभिःपुत्रै र्भारं वहति गर्दभी
२ अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः
सकृद्दुःखकरावाद्यावन्तिमस्तुपदे पदे
३ सुलभाः पुरुषा राजन् सततं प्रियवादिनः
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः
४ राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः
लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजा

५ यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते
कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते तरवः कथम्
६ सर्वे यत्र विनेतारः सर्वे पण्डितमानिनः
सर्वे महत्त्वमिच्छन्ति कुलं तदवसीदति
७ कृतार्थः स्वामिनं द्वेष्टि कृतदारस्तु मातरम्
जातापत्या पतिं द्वेष्टि गतरोगश्चिकित्सकम्
८ आज्ञा कीर्तिः पालनं सज्जनानां, दानं भोगो मित्रसंरक्षणं च
येषामेते षड्गुणा न प्रवृत्ताः, कोऽर्थस्तेषां पार्थिवोपाश्रयेण
९ क्रतौ विवाहे व्यसने रिपुक्षये, यशस्करे कर्मणि मित्रसंग्रहे
प्रियासु नारीष्वधनेषु बन्धुषु, धनव्ययस्तेषु न गण्यते बुधैः
१० नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन
इति महति विरोधे वर्तमानेऽसमाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता

---

११ अहो दुर्जनसंसर्गान्मानहानिः पदे पदे
पावको लोहसंगेन मुद्गरैरभिहन्यते
१२ व्यापारान्तरमुत्सृज्य वीक्षमाणो वधूमुखं
यो गृहेष्वेव निद्राति दरिद्राति स दुर्मतिः
१३ सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरम्
आत्मानं किं न स द्वेष्टि सेव्यासेव्यं न वेत्ति यः
१४ सेवा श्ववृत्तिर्यैरुक्ता न तैः सम्यगुदीरितम्
स्वच्छन्दचारी कुत्र श्वा विक्रीतासुः क्व सेवकः

१५ यदि रामा यदि च रमा, यदि तनयो विनयधीगुणोपेतः
तनये तनयोत्पत्तिः, सुरवरनगरे किमाधिक्यम्.

१६ सीदन्ति सन्तो विलसन्त्यसन्तः
पुत्रा म्रियन्ते जनकश्चिरायुः
परेषु मैत्री स्वजनेषु वैरं
पश्यन्तु लोकाः कलिकौतुकानि

१७ मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः
क्षान्त्याभीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः

## कोशः

स्वपिति=सुएछे
वरं=सारो
आद्यः=पेहेलो
अन्तिमः=छेल्लो
सकृत्=एकवखत
पथ्यं=हितकारक
राज्ञि धर्मिणि सति=जो राजा धार्मिक होय तो
अनुवर्तते=अनुसरेछे
भेदः=फितुरी
निर्मुक्तः=छुटो थयेलो
विनेता=आगेवान
पंडितमानी=पोताने पंडित समजवावाळो
कृतार्थः=जेनुं कारज थयुं ते
प्रवृत्ताः=चालु थया
कोर्थः=शो फायदो
क्रतुः=यज्ञ
द्वेष्यतां याति=वेरने पामे छे
जनपदः=देश
असमानः=विशेष
पावकः=अग्नि
व्यापारान्तरं=बीजो धन्दो
परुषं=कठोर
श्ववृत्तिः=कूतरानुं जीववुं
उदीरितं=कह्युं
विक्रीतः=वेंचेलो
सुरवरः=इन्द्र
रामा=सुन्दर स्त्री
पटुः=कुशळ
जल्पकः=बकवाट करवावाळो
प्रगल्भः=प्रौढ
अभिजातः=सारो
अगम्यः=जाणी न शाय एवो

## पाठ २३

१ को देशः कानि मित्राणि कः कालः कौ व्ययागमौ
कश्चाहं काच मे शक्तिरिति चिन्त्यं मुहुर्मुहुः

२ उद्घाटितनवद्वारे पंजरे विहगोऽनिलः
यत्तिष्ठति तदाश्चर्यं प्रयाणे विस्मयः कुतः

३ प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया
तृप्ताः कामेन बाध्यन्ते प्राणिनो निशि निद्रया

४ नित्यमाचरतः शौचं कुर्वतः पितृतर्पणम्
यस्य नोद्विजते चेतः शास्त्रं तस्य करोति किम्

५ विद्वानेव विजानाति विद्वज्जनपरिश्रमम्
नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्

६ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति

७ नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति
स एव प्रच्युतः स्थानात् शुनापि परिभूयते

८ स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः
इति संचिन्त्य मतिमान् स्वस्थानं न परित्यजेत्

९ इतरकर्मफलानि यदृच्छया
विलिखितानि सहे चतुरानन
अरसिकेषु कवित्वनिवेदनम्
शिरसि मालिख मालिख मालिख

१० रत्नैर्महार्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम्
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः

११ स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः
विशेषतस्तत्वविदां समाजे
विभूषणं मौनमपंडितानाम्

१२ यदा किंचिज्ज्ञोऽहं द्विपइव मदान्धः समभवम्
तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः
यदा किंचित् किंचित् बुधजनसकाशादवगतम्
तदा मूर्खोसीति ज्वर इव मदो मे व्यपगतः

१३ क्वचिद्भूमौ शय्या क्वचिदपि च पर्यंकशयनम्
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः
क्वचित्कंथाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं नच सुखम्

१४ वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति.

१५ चेतोहरा युवतयः स्वमनोनुकूलाः
सद्बान्धवाः प्रणतिगर्भगिरश्च भृत्याः
गर्जन्ति दन्तिनिवहास्तरलास्तुरंगाः
संमीलने नयनयोर्न हि किंचिदस्ति.

## कोशः

मुहुः=वारंवार
उद्घाटितं=खुलुं
विगहः=पक्षी.
पिपासा=तरस
निशि=रात्रे
शौचं=शुद्धता
उद्विजते=कंटाळेछे
वेदनाः=दुःख.
नक्रः=मगरमच्छ
प्रच्युतः=खसीगयेलो
यदृच्छया=भले.
निवेदनं=कहेवुं
महार्हं=उंचुं
तुतुषुः=संतुष्ट थया
भीतिं भेजिरे=भयने पाम्या
विरामंप्रययुः=विश्रान्तिने पाम्या
स्वायत्तं=पोताना ताबा माहेलुं
एकान्तगुणं=नक्की गुण करवावाळुं
विधाता=ब्रह्मा
द्विपः=हाथी.
अवलिप्तं=गर्ववाळुं
सकाशात्=पासेथी
अवगतं=जाण्युं
शाल्योदनः=भात
मनस्वी=मानीपुरुप
कुल्या=नानकडो पाणीनो प्रवाह
शिला=पथ्थर
कुरंगः=हरण
व्यालः=सर्प
माल्यं=माळा
पीयूषवर्षः=अमृतनो वरसाद
समुन्मीलति=प्रकाशेछे
चेतोहराः=मनोहर
प्रणतिः=नम्रता
गीः=वाणी
दन्ती=हाथी
निवहः=समुदाय
संमीलनं=बंद करवुं

---

## पाठ २४

१ आदरेण यथा स्तौति धनवन्तं धनेच्छया
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात्

२ स्वमस्तकसमारूढं मृत्युं पश्येज्जनो यदि
आहारोऽपि न रोचेत किमुतान्या विभूतयः

३ मृत्योर्बिभेषि किं मूढ भीतं मुंचति किं यमः
अजातं नैव गृह्णाति कुरु यत्नमजन्मनि

४ अशनं मे वसनं मे, जाया मे बन्धुवर्गो मे
इति मे मे कुर्वाणं, कालवृको हन्ति पुरुषाजं

५ भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः

६ अवश्यंयातारश्चिरतरमुषित्वापि विषयाः
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून्
व्रजन्तः स्वातंत्र्याद्तुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विद्धति

७ आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्

८ तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तः सन् शालीन् कवलयति शाकाज्यवलितान्
प्रदीप्ते कामाग्नौ सुदृढतरमाश्लिष्यति वधूम्
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः

९ हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितम्
व्यालानां पशवस्तृणांकुरभुजः सृष्टाः स्थलीशायिनः
संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणाम्
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः

१० मान्धाता स महीपतिः क्षितितलेलंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः
अन्येचापि युधिष्ठिरप्रभृतयो यावन्त एवाभवन्
नैकेनापि समं गता वसुमती मुंज त्वया यास्यति

११ अजानन्माहात्म्यं पततु शलभो दीपदहने
समीनोप्यज्ञानाद्बडिशयुतमश्नातुपिशितम्
विजानन्तो प्येते वयमिहविपज्जालजटिलान्
न मुंचामः कामानहहगहनो मोहमहिमा

१२ क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनाःक्लेशान्न तप्तं तपः
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं
तत्तत्कर्मकृतं यदेव मुनिभिस्तैस्तैःफलैर्वंचितम्

१३ क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः
जराजीर्णैरंगैर्नटइववलीमण्डिततनु-
र्नरः संसारांके विशति यमधानीजवनिकाम्

१४ केचिद्वदन्ति धनहीनजनो जघन्यः
केचिद्वदन्ति गुणहीनजनो जघन्यः
व्यासो वदत्यखिलवेदपुराणविज्ञो
नारायणस्मरणहीनजनो जघन्यः

## कोशः

| | | |
|---|---|---|
| रोचेत=रुचशे | अतुलः=जेने उपमा न अपाय एवो | स्थली=जमीन |
| बिभेति=बीयेछे | विदधाति=करेछे | क्षमः=शक्तिमान् |
| अजातः=उत्पन्न न थयेलो | गतागतैः=आवजावथी | अन्वेषयन्=गोततोएवो |
| अशनं=खोराक | अहरहः=रोजनारोज | प्रभृतिः=मुख्य |
| वसनं=कपडुं | संक्षीयते=ओछुं थायछे | यावन्तः=जेटला |
| वृकः=वरू | गुरुः=मोहोटो | शलभः=पतंगीयो |
| भुक्ताः=खवाया | त्रासः=भय | पिशितं=मांस |
| तप्ताः=तपाया | उन्मत्तभूतं=गांडुंबनेलुं | जटिलः=भरपूर |
| जीर्णाः=वुड्ढा थया | सुरभि=सुगंधवाळुं | सोढाः=सहन कर्यां |
| यातारः=जशे | वलिताः=मिश्रित | वंचितं=ठगाव्युं |
| चिरतरं=लांबा वखत लगण | विपर्यस्यति=उंधुं समजेछे | जवनिका=पडदो |
| उषित्वाः=रहीने | कल्पितं=बनाव्युं | जघन्यः=हलको |
| | | विज्ञः=प्रवीण |

---

## अथसंधिप्रकरणम्

येनाक्षरसमाम्नाय मधिगम्य महेश्वरात्
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः
येन धौता गिरःपुंसां विमलैःशब्दवारिभिः
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः

१

अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय् शषसर्, हल् इति माहेश्वराणिसूत्राणि, अणादिप्रत्याहार संज्ञार्थानि, एषामन्त्याः इत्संज्ञकाः,

२

आदिरन्त्येनसहेता=अन्त्येन इत्संज्ञकेन सहोच्चरितः आदिः मध्यगानां वर्णानां स्वस्यच संज्ञास्यात्. एवं सर्वे प्रत्याहाराः साधनीयाः, यथा अच् हल् अण् अक् इक् यण् एच् इत्यादयः

३

परः संनिकर्षः संहिता=वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्. संहितैकपदे नित्या, नित्याधातूपसर्गयोः, नित्यासमासे वाक्येतु, साविवक्षामपेक्षते.

---

१

इकोयणचि=इकःस्थाने यण्स्यात् अचिपरे संहितायाम् इत्युक्त्वा, मध्वरिः, धात्रंशः, लाकृतिः

२

एचोयवायावः=एचांस्थाने क्रमात् अय् अव् आय् आव्एते आदेशाःस्युः अचिपरे. (पदान्तयोश्चयवयोः लोपोवा) तइमे, द्वाविमौ

३

आद्गुणः=अवर्णादचिपरे पूर्वपरयोःस्थाने एको गुणादेशः स्यात्. देवेशः, गंगोदकम्, कृष्णर्द्धिः, तवल्कारः,

४

वृद्धिरेचि=आत् एचिपरे पूर्वपरयोःस्थाने वृद्धिरेकादेशःस्यात् गुणापवादः, कृष्णैकत्वं, गंगौघः, देवैश्वर्यम्, कृष्णौत्कंठ्यम्

५

अकः सवर्णे दीर्घः=अकः सवर्णेऽचिपरेपूर्वपरयोःस्थाने दीर्घ एकादेशःस्यात्. दैत्यारिः, श्रीशः, भानूदयः

६

एङःपदान्तादति=पदान्तात् एङः अतिपरे पूर्वरूप मेकादेशः स्यात्, हरेऽव, विष्णोऽव,

---

१

स्तोःश्चुनाश्चुः=सकारतवर्गयोःस्थाने शकारचवर्गौस्तःशकार चवर्गाभ्यां योगेसति. हरिश्शेते, रामश्चिनोति, सच्चित्, शार्ङ्गिञ्जय.

२

ष्टुनाष्टुः=सकारतवर्गयोःस्थाने षकारटवर्गौस्तः षकारटवर्गाभ्यां योगेसति. रामष्षष्ठः, रामष्टीकते, पेष्टा, तट्टीका, चक्रिण्ढौकसे.

३

यरोऽनुनासिकेऽनुनासिकोवा=पदान्तस्य यरःस्थाने अनुनासिको वास्यात् अनुनासिकेपरे. एतन्मुरारिः—एतन्मुरारिः

४

तोर्लि=तवर्गस्यस्थाने परसवर्णःस्यात् लकारेपरे. तल्लयः, श्रद्धावाँल्लभते

५

झयोहोन्यतरस्याम्=झयःपरस्यहस्यस्थाने पूर्ववर्गचतुर्थो वास्यात्. वाग्घरिः—वाग्हरिः

६

झलांजशोन्ते=पदान्ते झलांस्थाने जशःस्युः वागीशः, चिद्रूपम्.

७

खरिच=खरिपरे झलांस्थानेचरःस्युः, तत्फलं, यत्करोषि,

८

शश्छोऽटि=पदान्तात् झयः परस्य शस्यस्थाने छोवास्यात् अमिपरे ( दस्य चुत्वेनजकारेकृते खरिचेतिचकारः ) तच्छिवः–तच्शिवः, तच्छ्लोकेन–तच्श्लोकेन, यच्छ्रेयः,

९

मोनुस्वारः=पदान्तस्य मस्यस्थाने अनुस्वारः स्याद्धलिपरे हरिंवन्दे.

१०

वापदान्तस्य=पदान्तस्य अनुस्वारस्यस्थाने परसवर्णोवास्यात् ययिपरेसति. त्वङ्करोषि–त्वंकरोषि.

११

ङमोह्रस्वादचिङमुण्णित्यं=ह्रस्वात्परोयोङम् तदन्तं यत्पदं तस्मात्परस्य अचः नित्यंङमुडागमःस्यात्. प्रत्यङ्ङात्मा. सुगण्णीशः, सन्नच्युतः, कुर्वन्नपि,

१२

नश्छव्यप्रशान्=अम्परे छविपरेसति पदान्तस्यनस्यस्थाने रुःस्यात् ( रोःपूर्वस्मात्परोऽनुस्वारश्च )

१३

खरवसानयोर्विसर्जनीयः=खरिअवसानेच परे रेफस्यस्थाने विसर्जनीयःस्यात् ( इति विसर्गे सति )

१४

विसर्जनीयस्यसः=खरिपरे विसर्जनीयस्यस्थानेसः स्यात् ( इतिसकारेकृते ) सर्वांस्तथा, प्रज्ञावादांश्च.

१५

छेच=ह्रस्वस्यछेपरे तुगागमःस्यात्. अच्छेद्यः

१६

पदान्ताद्वा=पदान्तात् दीर्घात् छेपरे तुक् वास्यात्. लक्ष्मी-च्छाया, लक्ष्मीछाया,

---

१

ससजुषोरुः=पदान्तस्य सस्य स्थानेरुःस्यात्

२

अतोरोरप्लुतादप्लुते=अतःपरस्यरोःस्थाने उःस्यात् अतिपरे शिवोऽर्च्यः,

५

झयोहोन्यतरस्याम्=झयःपरस्यहस्यस्थाने पूर्ववर्गचतुर्थो वास्यात्. वाग्घरिः—वाग्हरिः

६

झलांजशोन्ते=पदान्ते झलांस्थाने जशःस्युः वागीशः, चिद्रूपम्.

७

खरिच=खरिपरे झलांस्थानेचरःस्युः, तत्फलं, यत्करोपि,

८

शश्छोऽटि=पदान्तात् झयः परस्य शस्यस्थाने छोवास्यात् अमिपरे ( दस्य चुत्वेनजकारेकृते खरिचेतिचकारः ) तच्छिवः—तच्शिवः, तच्छ्लोकेन—तच्श्लोकेन, यच्छ्रेयः,

९

मोनुस्वारः=पदान्तस्य मस्यस्थाने अनुस्वारः स्याद्धलिपरे हरिंवन्दे.

१०

वापदान्तस्य=पदान्तस्य अनुस्वारस्यस्थाने परसवर्णोवास्यात् ययिपरेसति. त्वङ्करोपि—त्वंकरोषि.

११

ङमोह्रस्वादचिङमुण्णित्यं=ह्रस्वात्परोयोङम् तदन्तं यत्पदं तस्मात्परस्य अचः नित्यंङमुडागमःस्यात्. प्रत्यङ्ङात्मा. सुगण्णीशः, सन्नच्युतः, कुर्वन्नपि,

१२

नश्छव्यप्रशान्=अम्परे छविपरेसति पदान्तस्यनस्यस्थाने रुःस्यात् ( रोःपूर्वस्मात्परोऽनुस्वारश्च )

१३

खरवसानयोर्विसर्जनीयः=खरिअवसानेच परे रेफस्यस्थाने विसर्जनीयःस्यात् ( इति विसर्गे सति )

१४

विसर्जनीयस्यसः=खरिपरे विसर्जनीयस्यस्थानेसः स्यात् ( इतिसकारेकृते ) सर्वांस्तथा, प्रज्ञावादांश्च.

१५

छेच=ह्रस्वस्यछेपरे तुगागमःस्यात्. अच्छेद्यः

१६

पदान्ताद्वा=पदान्तात् दीर्घात् छेपरे तुक् वास्यात्. लक्ष्मीच्छाया, लक्ष्मीछाया,

---

१

ससजुषोरुः=पदान्तस्य सस्य स्थानेरुःस्यात्

२

अतोरोरप्लुतादप्लुते=अतःपरस्यरोःस्थाने उःस्यात् अतिपरे शिवोऽर्च्यः,

६५८

३

हशिच=अतःपरस्यरोःस्थाने उःस्यात्हशिपरे. शिवोवन्द्यः

४

भोभगोअघो अपूर्वस्ययोशि=एतत्पूर्वस्यरोःस्थाने यादेशः-स्यात् अशिपरे ( वैकल्पिकश्चयलोपः ) भो अच्युत, देवाइह-देवायिह,

५

हलिसर्वेषां=भोभगो अघो अपूर्वस्ययस्य लोपःस्यात् हलि. भोदेवाः, देवानम्याः, देवायान्ति.

६

रोरि=रेफस्यलोपःस्यात् रेफेपरे.

७

ढ्लोपेपूर्वस्यदीर्घोऽणः=पूर्वस्यच अणःदीर्घः. हरीरम्यः, शंभूराजते.

८

एतत्तदोःसुलोपोऽकोरनञ्समासेहलि=एतत्तदोःयःसुः तस्यलोपः स्यात् हलिपरे. एपविष्णुः, सशंभुः

---

भव्यः काव्यविनोदोऽयं गोपालगुरवेऽर्पितः
प्रीयतांतेनगोपालो नममेहास्ति किंचन.

---

श्रीमद्भगवद्गीतापाठशाला॰

# काव्यविनोदः

मोहमय्याम्

निर्णयसागरयन्त्रालये मुद्रापितः

शकाब्दाः १८२८

॥ श्रीगणेशाय नमः ॥

# काव्यविनोदः

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
नहि सिंहस्य सुप्तस्य प्रविशन्ति मुखे गजाः ॥ १ ॥
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत् ॥ २ ॥
आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ३ ॥
अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥ ४ ॥
विहाय पौरुषं यो हि दैवमेवावलंबते ।
प्रासादसिंहवत् तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥ ५ ॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ६ ॥
योजनानां सहस्रन्तु शनैर्गच्छेत्पिपीलिका ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥ ७ ॥
पूर्वजन्मजनितं पुराविदः कर्म दैवमिति संप्रचक्षते ।
उद्यमेन तदुपार्जितं चिरात् दैवमुद्यमवशं न तत्कथम् ॥८॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
"दैवेन देयमिति" कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ९ ॥

## पाठः २

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ १ ॥

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम महासिंहः, सच सर्वदा पशूनां वधं कुर्वन्नास्ते, ततः सर्वैः पशुभिर्मिलित्वा, स सिंहो-विज्ञप्तः, मृगेन्द्र, किमर्थं एकदा बहुपशुघातः क्रियते, यदि प्रसादो भवति, तदा वयमेव भवदाहाराय प्रत्यहं एकैकं पशुं उपढौकयामः, ततः सिंहेनोक्तम्, यद्येतदभिमतं भवतां, तर्हि तथैव भवतु, ततःप्रभृति, एकैकं पशुं उपकल्पितं भक्षयन्नास्ते. अथ कदाचित्, वृद्धशशकस्य वारः समायातः, सोऽचिन्तयत्,

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पंचत्वं चेत् गमिष्यामि किं सिंहानुनयेन मे ॥ २॥

तत्, मन्दं मन्दं गच्छामि, ततः सिंहोऽपि क्षुधापीडितः, कोपात्तमुवाच, कुतस्त्वं विलंब्य समागतोऽसि ? शशकोऽब्रवीत्, देव, नाहमपराधी, आगच्छन्, पथि सिंहान्तरेण बलात् धृतः, तस्याग्रे, पुनरागमनाय शपथं कृत्वा, स्वामिनं निवेदयितुं, अत्रागतोऽस्मि, सिंहः सकोपं आह, सत्वरं गत्वा, दुरात्मानं दर्शय, क्व स दुरात्मा तिष्ठति ? ततः शशकस्तं गृहीत्वा, गभीरकूपं दर्शयितुं गतः, तत्रागत्य "स्वयमेव पश्यतु स्वामी" इत्युक्त्वा, तस्मिन् कूपजले तस्यैव सिंहस्य प्रतिबिंबं दर्शितवान्. ततोऽसौ क्रोधाध्मातः, तस्योपरि आत्मानं निक्षिप्य, पंचत्वं गतः, अतोऽहं ब्रवीमि 'बुद्धिर्यस्य इत्यादि,

---

## पाठः ३

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।

औरसं कृतसम्बन्धं तथा वंशक्रमागतम् ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ २ ॥
कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ॥ ३ ॥
व्याधितस्यार्थहीनस्य देशान्तरगतस्य च ।
नरस्य शोकदग्धस्य सुहृद्दर्शनमौषधम् ॥ ४ ॥
भ्रान्तः कोशकृदित्याह "मेघच्छन्नेह्नि दुर्दिनं" ।
अहं तद्दुर्दिनं मन्ये यत्र मित्रोदयो नहि ॥ ५ ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखम् ॥ ६ ॥
रहस्यभेदो याञ्चा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतं एतन्मित्रस्य दूषणं ॥ ७ ॥

पापान्निवारयति, योजयते हिताय
गुह्यं च गूहति, गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति, ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ८ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य, तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवत्, दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन, शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ९ ॥

---

## पाठः ४

गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सतां ।
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ॥ १ ॥
गुणवज्जनसंसर्गाद्याति स्वल्पोपि गौरवं ।

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न वै जनाः ॥ ३ ॥
यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् ।
नहि कस्तूरिकामोदः शपथेन निवार्यते ॥ ४ ॥
गुणैर्गौरवमायाति, नोच्चैरासनमास्थितः ।
प्रासादशिखरारूढः काकः किं गरुडायते ॥ ५ ॥
गुणो गुणान्तरापेक्षी स्वरूपख्यातिहेतवे ।
स्वभावरम्यं लावण्यं तारुण्येन मनोहरम् ॥ ६ ॥
परैः प्रोक्ता गुणा यस्य निर्गुणोपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः ॥ ७ ॥
अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥ ८ ॥
कौशेयं कृमिजं, सुवर्णमुपलादिन्दीवरं गोमयात्
पंकात्तामरसं, शशांक उदधे,-र्गोपित्ततो रोचना ।
काष्ठादग्नि,-रहेः फणादपि मणि,-र्दूर्वापि गोरोमतः
प्राकाश्यं स्वगुणोदयेन गुणिनो यास्यन्ति,किं जन्मना? ॥९॥

---

## पाठः ५

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन ।
वानरानुपदिश्याथ स्थानभ्रष्टा ययुः खगाः ॥ १ ॥

अस्ति नर्मदातीरे विशालः शाल्मलीतरुः, तत्र निर्मितनीडक्रोडे, पक्षिणो निवसन्ति सुखेन, अथैकदा, वर्षासु महती वृष्टिर्बभूव, ततो वानरान् तरुतलेऽवस्थितान्, कंपमानानवलोक्य, कृपया पक्षिभिरुक्तं, भो भो वानराः शृणुत.

अस्माभिर्निर्मिता नीडाश्चंचुमात्राहृतैस्तृणैः ।

तच्छ्रुत्वा, वानरैर्जातामर्षैः, आलोचितं "अहो निर्वातनीडगर्भा वस्थिताः सुखिनः पक्षिणः अस्मान्निन्दन्ति" भवतु तावत् वृष्टे उपशमः, अनन्तरं शान्ते वर्षे, तैर्वानरैर्वृक्षमारुह्य, सर्वे नीड भग्नाः, तेषामण्डानि च अधः पातितानि, अतोहं ब्रवीमि "विद्वाने वोपदेष्टव्य इति"

---

## पाठः ६.

महानुभावसंसर्गः कस्य नोन्नतिकारकः ? ।
रथ्याम्बु जाह्नवीसंगात् त्रिदशैरपि, वन्द्यते ॥ १ ॥
हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ २ ॥
कीटोऽपि सुमनःसंगादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ३ ॥
संगः सर्वात्मना हेयः स चेत्त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः साधुसंगो हि भेषजं ॥ ४ ॥
गवाशनानां स शृणोति वाक्यं अहं हि राजन् वचनं मुनीनाम् ।
न चास्य दोषो न च मद्गुणो वा संसर्गजा दोषगुणा भवन्ति ॥५॥
असज्जनः सज्जनसंगिसंगात् करोति दुःसाध्यमपीह साध्यम् ।
पुष्पाश्रयाच्छंभुशिरोऽधिरूढा पिपीलिका चुंबति चन्द्रबिंबम्॥६॥
जाड्यं धियो हरति, सिंचति वाचि सत्यं,
मानोन्नतिं दिशति, पापमपाकरोति ।
चेतः प्रसादयति, दिक्षु तनोति कीर्तिम्
सत्संगतिः कथय किं न करोति पुंसाम् ॥ ७ ॥
संतप्तायसि संस्थितस्य पयसो, नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं, तन्मौक्तिकं जायते

## पाठः ७.

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ १ ॥

अस्ति दुर्दान्तो नाम महासिंहः, तस्य पर्वतकंदरं अधिशयानस्य, केसराग्रं, कश्चिन्मूषिकः प्रत्यहं छिनत्ति, ततः केसराग्रं लूनं दृष्ट्वा, कुपितः विवरान्तर्गतं मूषकमलभमानः सोऽचिन्तयत्.

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते ।
तमाहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ २ ॥

इत्यालोच्य, तेन रात्रौ ग्रामं गत्वा, विश्वासमुत्पाद्य, दधिकर्णनामा बिडालः, यत्नेनानीय, मांसाहारं दत्वा, स्वकन्दरे स्थापितः, चाटुशतैः संवर्धितश्च, अनन्तरं तद्भयात् मूषकोऽपि बिलान्न निःसरति. तेनासौ सिंहः अक्षतकेसरः सुखं स्वपिति, मूषकशब्दं यदा यदा शृणोति, तदा तदा मांसाहारदानेन तं बिडालं संवर्धयति. अथैकदा स मूषिकः क्षुधापीडितो, बहिः संचरन्, बिडालेन प्राप्तो व्यापादितश्च. अनन्तरं स सिंहः, चिरात् मूषिकमनवलोक्य, तत्कृतारावमपि अनाकर्ण्य, क्रमशः बिडालस्य आहारदाने मन्दादरो बभूव. ततो दुर्बलो दधिकर्णः पलायितुमक्षमः पंचत्वं गतः, अतोहं ब्रवीमि " निरपेक्षो न कर्तव्य इति "

---

## पाठः ८

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ १ ॥
परोपकृतिकैवल्ये तोलयित्वा जनार्दनः ।
गुर्वीमुपकृतिं मत्वा अवतारान् दशाग्रहीत् ॥ २ ॥
परोपकारशून्यस्य धिङ्ग् मनुष्यस्य जीवितम् ।

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥ ४ ॥
उपकर्तुं यथा स्वल्पः समर्थो न तथा महान् ।
प्रायः कूपस्तृषा हन्ति सततं नतु वारिधिः ॥ ५ ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्नतु कंकणेन ।
विभाति कायः करुणापराणां परोपकारैर्नतु चंदनेन ॥६॥
परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥७॥
यो नात्मजे, नच गुरौ, नच बन्धुवर्गे
दीने दयां न कुरुते नच भृत्यवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय, बलिं च भुंक्ते ॥ ८ ॥

---

## पाठः ९.

कंकणस्य तु लोभेन मग्नः पंके सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥ १ ॥

एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते, भो भोः पान्थाः इदं सुवर्णकंकणं गृह्यतां, ततो लोभाकृष्टेन केनचित्पान्थेन आलोचितं, भाग्येन एतत् संभवति, किन्तु अस्मिन् आत्मसंदेहे प्रवृत्तिर्न विधेया, अथवा सर्वत्र अर्थार्जने प्रवृत्तिः संदेह एव, तन्निरूपयामि तावत्, प्रकाशं ब्रूते, कुत्र तव कंकणं, व्याघ्रो हस्तं प्रसार्य दर्शयति, पान्थोवदत् कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच, शृणु रे पान्थ, अहं प्राक् यौवनदशायामेव अतिदुर्वृत्तः आसं, अनेकगोमानुषाणां वधात्, मे पुत्रा मृता दाराश्च, वंशहीनश्चाहं, ततः केनचिद्धार्मिकेण अहमादिष्टः “ दानधर्मादि-

वृद्धः गलितनखदन्तः कथं न विश्वासभूमिः ? मम च एतावांल्लोभविरहः, येन स्वहस्तस्थमपि सुवर्णकंकणं, यस्मै कस्मैचित् दातुमिच्छामि, तथापि " व्याघ्रो मानुषं खादति " इति लोकप्रवादो दुर्निवारः, मयाच धर्मशास्त्राण्यधीतानि, त्वंच अतीव दुर्गतः, तेन तत्तुभ्यं दातुं सयत्नोऽहम्. तथाच उक्तम्,

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥ २ ॥

तत् अत्र सरसि स्नात्वा सुवर्णकंकणं गृहाण, ततो यावदसौ लोभात् सरः स्नातुं प्रविशति, तावन्महापंके निमग्नः पलायितुं अक्षमश्च, पंके पतितं दृष्ट्वा, व्याघ्रोवदत्. अहह महापंके पतितोसि अतस्त्वामहमुत्थापयामि इत्युक्त्वा शनैः शनैरुपगम्य, तेन व्याघ्रेण धृतः स पान्थः अचिन्तयत्, तन्मया भद्रं न कृतं, यदत्र मारात्मके विश्वासः कृतः, इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च अतोहं ब्रवीमि. "कंकणस्य तु" इत्यादि ॥

---

## पाठः १०.

संतोषामृततृप्तानां यत्सुखं शान्तचेतसां ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां ॥ १ ॥
अकृत्वा परसंतापं अगत्वा खलमंदिरम् ।
अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु ॥ २ ॥
यो मे गर्भगतस्यापि वृत्तिं कल्पितवान् प्रभुः ।
शेषवृत्तिविधानाय स किं सुप्तोथवा मृतः ॥ ३ ॥
पंचमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणी चाप्रवासी च स वारिचर मोदते ॥ ४ ॥
सर्वत्र संपदस्तस्य संतुष्टं यस्य मानसं ।

सर्पाः पिबन्ति पवनं, नच दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
संतोष एव पुरुषस्य परं निधानं ॥ ६ ॥
चीराणि किं पथि न सन्ति, दिशन्ति भिक्षां
नैवांघ्रिपाः फलभृतः, सरितोप्यशुष्यन् ।
रुद्धा गुहाः ? किमजितोवति नोपपन्नान्
कस्माद्भजन्ति कवयो धनदुर्मदांधान् ॥ ७ ॥
वयमिह परितुष्टा वल्कलै,-स्त्वं च लक्ष्म्या
सम इह परितोषो, निर्विशेषो विशेषः ।
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोर्थवान् को दरिद्रः ॥ ८ ॥

---

## पाठः ११.

वलिभिर्मुखमाक्रान्तं पलितैरंकितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ १ ॥
अपि मेरूपमं, प्राज्ञं अपि शूरमपि स्थिरम् ।
तृणीकरोति तृष्णैका निमिषेण नरोत्तमम् ॥ २ ॥
आशा नाम मनुष्याणां काचिदाश्चर्यशृंखला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ॥ ३ ॥
तेनाधीतं, श्रुतं तेन, तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलंबितम् ॥ ४ ॥
आशाया ये दासाः ते दासाः सन्ति सर्वलोकस्य ।
आशा येषां दासी तेषां दासायते लोकः ॥ ५ ॥
अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुण्डम् ।

भिक्षाशनं, तदपि नीरस,–मेकवारं
शय्या च भूः, परिजनो निजदेहमात्रं ।
वस्त्रं सुजीर्णशतखण्डमयी च कंथा
हाहा, तथापि विषयान् न जहाति चेतः ॥ ७ ॥
उत्खातं, निधिशंकया क्षितितलं, ध्माता गिरेर्धातवः
निस्तीर्णः सरितां पति,–र्नृपतयो यत्नेन संसेविताः ।
मन्त्राराधनतत्परेण मनसा, नीताः श्मशाने निशाः
प्राप्तः काणवराटकोपि न मया, तृष्णेऽधुना मुंच माम् ॥८॥
निःस्वो वष्टि शतं, शती दशशतं, लक्षं सहस्राधिपः
लक्षेशः क्षितिराजतां, क्षितिपतिश्चक्रेशतां वांछति ।
चक्रेशः सुरराजतां, सुरपतिर्ब्रह्मास्पदं वांछति
ब्रह्मा विष्णुपदं, हरिः शिवपदं, तृष्णावधिं को गतः? ॥९॥

---

## पाठः १२.

कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः ।
पश्य संचयशीलोऽसौ धनुषा जंबुको हतः ॥ १ ॥

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः, सच एकदा मृगं अन्विष्यमाणः विंध्याटवीं गतवान्, ततस्तेन व्यापादितं मृगमादाय गच्छता, घोराकृतिः शूकरो दृष्टः, तेन व्याधेन मृगं भूमौ निधाय, शूकरः शरेण आहतः, शूकरेणापि घनघोरगर्जनं कृत्वा, स व्याधो मुष्कदेशे हतः सन्, छिन्नद्रुम इव भूमौ निपपात, अथ तयोः पादास्फालनेन, एकः सर्पोऽपि मृतः, अनन्तरं दीर्घरावो नाम जम्बूकः, आहारार्थं परिभ्रमन्, मृतान् तान् मृगव्याधसर्पशूकरान् अपश्यत्, अचिन्तयच्च, अहो अद्य महत् भोज्यं मे दैवात् समुपस्थितं.

अचिंतितानि दुःखानि यथैवायान्ति देहिनाम् ।

भवतु तावत्, एषां मांसैर्मासत्रयं मे सभार्यस्य सपुत्रस्य सुखेन गमिष्यति.

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ १ ॥

ततः प्रथमबुभुक्षायां, इदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि, इत्युक्त्वा तथा कृते सति, छिन्नेस्नायुबन्धने, उत्प तितेन धनुषा हृदि निर्भिन्नः, स दीर्घरावः पंचत्वं गतः, अतोहं ब्रवीमि "कर्तव्यः संचय इत्यादि"

---

## पाठः १३.

अनुकूले विधौ देयं यतः पूरयिता हरिः ।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ॥ १ ॥
यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ २ ॥
लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया ।
दातापि विसृजत्यर्थं तयैव ननु शंकया ॥ ३ ॥
बोधयन्ति न याचन्ते भिक्षाद्वारा गृहे गृहे।
दीयतां दीयतां नित्यं अदातुः फलमीदृशम् ॥ ४ ॥
शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु दाता भवति वा न वा ॥ ५ ॥
दातव्यं भोक्तव्यं सति विभवे संग्रहो न कर्तव्यः।
पश्यामि मधुकरीणां संचितमर्थं हरन्त्यन्ये ॥ ६ ॥
दानेन भूतानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशं ।
परोपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति ॥७॥

## पाठः १४.

वेपथुर्मलिनं वक्त्रं दीना वाक् गद्गदः स्वरः ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥ १ ॥
तृणादपि लघुस्तूलः तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥ २ ॥
देहीति वचनं श्रुत्वा देहस्थाः पंच देवताः ।
मुखान्निर्गत्य गच्छन्ति धीश्रीह्रींधृतिकीर्तयः ॥ ३ ॥
दारिद्र्यस्य परा मूर्तिर्याञ्चा, न द्रविणाल्पता ।
अपि कौपीनवान् शंभुस्तथापि परमेश्वरः ॥ ४ ॥
काक आह्वयते काकान् याचको न तु याचकान् ।
काकयाचकयोर्मध्ये वरं काको न याचकः ॥ ५ ॥
सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ ६ ॥
तावत्सर्वगुणालयः, पटुमतिः, साधुः, सतां वल्लभः
शूरः, सच्चरितः कलंकरहितो, मानी, कृतज्ञः, कविः ॥
दक्षो धर्मरतः सुशीलगुणवान् तावत्प्रतिष्ठान्वितो
यावन्निष्ठुरवज्रपातसदृशं देहीति नो भाषते ॥ ७ ॥
पंगो धन्यस्त्वमसि, न गृहं यासि योर्थी परेषाम् ।
धन्योऽन्ध त्वं, धनमदवतां नेक्षसे यन्मुखानि ॥
श्लाघ्यो मूक त्वमपि, कृपणं स्तौषि नार्थाशया यः ।
स्तोतव्यस्त्वं बधिर, न गिरं यः खलानां शृणोषि ॥ ८ ॥

---

## पाठः १५.

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।
हत्वा भिक्षुं महालोभान्निध्यर्थी नापितो हतः ॥ १ ॥

महता क्लेशेन भगवान् चन्द्रार्धचूडामणिः चिरमाराधितः, ततः क्षीणपापोऽसौ स्वप्ने दर्शनं दत्वा, भगवदादेशात् यक्षेश्वरेणादिष्टः, यत् त्वमद्य प्रातः क्षौरं कृत्वा, लगुडं हस्ते गृहीत्वा, गृहे निभृतं स्थास्यसि, ततः अस्मिन्नेवांगणे समागतं भिक्षुं द्रक्ष्यसि, तं निर्दयं लगुडप्रहारेण हनिष्यसि, ततः सुवर्णकलशो भविष्यति तेन त्वया यावज्जीवं सुखिना भवितव्यं, ततस्तथानुष्ठिते तद्वृत्तं, ततः क्षौरकरणाय आनीतेन नापितेन आलोक्य चिंतितं, अये निधिप्राप्तेरयमभ्युपायः, अहमप्येवं किं न करोमि? ततःप्रभृति नापितः प्रत्यहं तथाविधो लगुडहस्तः सुनिभृतं भिक्षोरागमनं प्रतीक्षते, एकदा तेन प्राप्तो भिक्षुर्लगुडेन व्यापादितः, तस्मादपराधात्सोपि नापितो राजपुरुषैर्व्यापादितः, अतोहं ब्रवीमि "पुण्याल्लब्धमित्यादि"

---

## पाठः १६.

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमांल्लोके यस्यार्थाः स हि पंडितः ॥ १ ॥
वयोवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः ।
सर्वे ते धनवृद्धानां द्वारि तिष्ठन्ति किंकराः ॥ २ ॥
स्त्रीरूपं मोहकं पुंसो यून एव भवेत्क्षणं ।
कनकं स्त्रीबालवृद्धषंडानामपि सर्वदा ॥ ३ ॥

यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयन्ते ॥ ४ ॥
त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृद्गणाश्च ।
तमर्थवन्तं पुनराश्रयन्ति अर्थो हि लोके पुरुषस्य बन्धुः ॥ ५ ॥
बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते ।

धनैर्निष्कुलीनाः कुलीना भवन्ति धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यःपरो बान्धवो नास्ति लोके धनान्यर्जयध्वं धनान्यर्जयध्वम् ७

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतात् ।
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ॥
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोस्तु नः केवलम् ।
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ ८ ॥

माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते ।
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता न चालिंगते ॥
अर्थप्रार्थनशंकया न कुरुते संभाषणं वै सुहृत् ।
तस्माद् द्रव्यमुपार्जयस्व सुमते द्रव्येण सर्वे वशाः ॥ ९ ॥

---

## पाठः १७.

हे दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन ॥ १ ॥

परीक्ष्य सत्कुलं विद्यां शीलं शौर्यं सुरूपताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥ २ ॥

अंबा तुष्यति न मया न स्नुषया सापि नांबया न मया ।
अहमपि न तया नतया वद राजन् कस्य दोषोयम् ॥ ३ ॥

अहो नु कष्टं सततं प्रवासः ततोतिकष्टः परगेहवासः ।
कष्टाधिका नीचजनस्य सेवा ततोतिकष्टा धनहीनता च ॥४॥

संगं नैव हि कश्चिदस्यकुरुते संभाष्यते नादरात् ।
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ॥
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया ।
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥ ५ ॥

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पक्वफलांबुभोजनम् ।

दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैर्भूषितम् ।
दग्धा वायुसुतेन रावणपुरी लंका पुनः स्वर्णभूः ॥
दग्धः पंचशरः पिनाकपतिना तेनाप्ययुक्तं कृतं ।
दारिद्र्यं जनतापकारकमिदं केनापि दग्धं नहि ॥ ७ ॥
"एको हि दोषो गुणसंनिपाते निमज्जतीन्दो" रिति यो बभाषे।
न तेन दृष्टं कविना हि सर्वं दारिद्र्यमेकं गुणकोटिहारि ॥ ८ ॥

---

## पाठः १८.

शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम् ।
शब्दहेतुं परिज्ञाय कुट्टिनी गौरवं गता ॥ १ ॥

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरं, तच्छिखरप्रदेशे घंटाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते, एकदा घंटामादाय पलायमानः कश्चिच्चोरो व्याघ्रेण व्यापादितः, तत्पाणिपतिता घंटा वानरैः प्राप्ता, वानरास्तां घंटामनुक्षणं वादयन्ति यतो नगरजनैः स मनुष्यः खादितो दृष्टः, प्रतिक्षणं घंटारवश्च श्रूयते, ततः घंटाकर्णः कुपितो मनुष्यान् खादयति, घंटांच वादयतीत्युक्त्वा, सर्वे जना नगरात्पलायिताः, ततः करालया नाम कुट्टिन्या विमृश्य, अनवसरोयं घंटावादः तत्किं मर्कटा घंटां वादयन्तीति स्वयं विज्ञाय राजा विज्ञापितः " देव ! यदि कियद्धनोपक्षयः क्रियते तदा अहमेनं घंटाकर्णं साधयामि, ततो राज्ञा तस्यै धनं दत्तं, कुट्टिन्या च मण्डलं कृत्वा तत्र गणेशादिपूजागौरवं दर्शयित्वा, स्वयं वानरप्रियफलान्यादाय, वनं प्रविश्य फलान्याकीर्णानि, ततो घंटां परित्यज्य वानराः फलासक्ता बभूवुः, कुट्टिनी च घंटां गृहीत्वा नगरमागता सर्वजनपूज्याभवत् अतोऽहं ब्रवीमि "शब्दमात्रान्न भेतव्यमित्यादि"

# पाठः १९.

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणां ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ १ ॥

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ २ ॥

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ३ ॥

शरदि न वर्षति गर्जति वर्षति वर्षासु निस्वनो मेघः ।
नीचो वदति न कुरुते वदति न साधुः करोत्येव ॥ ४ ॥

अद्यापि दुर्निवारं स्तुतिकन्या भजति चैव कौमारं ।
सद्भ्यो न रोचते साऽसन्तोप्यस्यै न रोचन्ते ॥ ५ ॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥ ६ ॥

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः कांचनं कान्तवर्णं
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनाम् ॥ ७ ॥

विजेतव्या लंका, चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्वे भवति महतां नोपकरणे ॥ ८ ॥

दृश्यंते भुवि भूरि निम्बतरवः कुत्रापि ते चन्दनाः

श्रूयंते करटारवाश्च सततं चैत्रे कुहूकूजितं ।
तन्मन्ये खलसंकुलं जगदिदं छित्राः क्षितौ सज्जनाः ॥ ९ ॥

---

## पाठः २०.

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ १ ॥
उपकारोपि नीचानामपकाराय जायते ।
पयःपानं भुजंगानां केवलं विषवर्धनम् ॥ २ ॥
मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनां ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ३ ॥
विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ४
जाड्यं ह्रीमति गण्यते व्रतरुचौ दंभः शुचौ कैतवं ।
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ॥
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे ।
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नांकितः॥ ५ ॥
एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये ।
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये ।
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ६ ॥
कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते ।
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योहमित्याशया ॥
कस्मात्कष्टमिदं त्वया व्यवसितं ? मद्देहमांसाशिनः
प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु लोकानिति ॥ ७ ॥
भिक्षो कन्था श्लथा ते, नहि शफरिवधे जाल, मश्नासि मत्स्यान्

दत्वांघ्रिं मूर्ध्न्यरीणां, तव किमु रिपवो, भित्तिभेत्तास्मि येषां।
चोरोसि, द्यूतहेतोः, त्वयि सकलमिदं नास्ति नष्टे विचारः ॥८॥

---

## पाठः २१.

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ १ ॥

कश्चित् शृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्, नीलीभाण्डे पतितः, पश्चात्तत उत्थातुमसमर्थः, प्रातरात्मानं मृतवत्संदर्श्य स्थितः, अथ नीलीभाण्डस्वामिना मृत इति ज्ञात्वा तस्मात् समुत्थाप्य दूरे नीत्वा परित्यक्तः, ततोऽसौ पलायितः वनं गत्वा शृगालानाहूय उक्तवान्, अहं भगवत्या वनदेवतया स्वहस्तेन अरण्यराज्ये सर्वौषधिरसेन अभिषिक्तः, तत् अद्यारभ्य अस्मदाज्ञया व्यवहारः कार्यः, शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टांगपातं प्रणम्य ऊचुः, यथाज्ञापयति देवः, इत्यनेनैव क्रमेण सर्वेषु अरण्यवासिषु तस्य आधिपत्यं बभूव, ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान् प्राप्य सदसि शृगालानवलोक्य लज्जमानेन अवज्ञया स्वज्ञातयः सर्वे दूरीकृताः, ततो विषण्णान् शृगालानवलोक्य केनचित् वृद्धशृगालेन प्रतिज्ञातं, मा विषीदत, यत् अनेन अनभिज्ञेन नीतिविदो मर्मज्ञाः वयं स्वसमीपात् परिभूताः, तत् यथायं नश्यति तथा विधेयं, यतोऽमी व्याघ्रादयः वर्णमात्रविप्रलब्धाः, शृगालमज्ञात्वा राजानमिमं मन्यन्ते, तत् यथायं परिचितो भवति तथा कुरुत, तत्रच एवमनुष्ठेयं, सर्वे संध्यासमये महारावं एकदैव करिष्यथ, ततस्तं शब्दमाकर्ण्य जातिस्वभावात् तेनापि शब्दः कर्तव्यः ततस्तथानुष्ठिते सति तद्वृत्तं। यतः।

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।

ततः शब्दात् अभिज्ञाय स व्याघ्रेण हतः अतोहं ब्रवीमि "आत्मपक्षं परित्यज्य इत्यादि" ।

---

## पाठः २२.

अलंकरोति हि जरा राजामात्यभिषग्यतीन् ।
विडंबयति पण्यस्त्रीमल्लगायकसेवकान् ॥ १ ॥
इयत्यामपि सामग्र्यां सुकृतं न कृतं त्वया ।
इतीव कुपितो दंतान् अन्तकः पातयत्ययम् ॥ २ ॥
यममिव करधृतदण्डं हरिमिव सगदं शशांकमिव वक्रम् ।
शिवमिव च विरूपाक्षं जरा करोत्यकृतपुण्यमपि ॥ ३ ॥
वदनं दशनविहीनं वाचो न परिस्फुटा गता शक्तिः ।
अव्यक्तेन्द्रियशक्तिः पुनरपि बाल्यं कृतं जरया ॥ ४ ॥
कृतान्तस्य दूती जरा कर्णमूले समागत्य वक्तीति लोकाः शृणुध्वम् ।
परस्त्रीपरद्रव्यवांछां त्यजध्वं भजध्वं रमानाथपादारविन्दम् ५
श्रुतिः शिथिलतां गता स्मृतिरपि प्रनष्टाधुना
गतिर्विपथमागता विगलिता द्विजानां ततिः ॥
गवामपि च संहतिः समुचितक्रियातश्च्युता
कृतानु जरयानया कलियुगस्य साधर्म्यता ॥ ६ ॥
गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिः
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ॥
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते ॥ ७ ॥

---

## पाठः २३.

अनुचितकर्मारंभः स्वजनविरोधो बलीयसा स्पर्धा ।

विरला जानन्ति गुणान् विरलाः कुर्वन्ति निर्धने स्नेहं ।
विरलाः परकार्यरताः परदुःखेनापि दुःखिता विरलाः॥ २ ॥

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोस्य विश्रामः ॥ ३ ॥

आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यं ।
संतोषो भीरुत्वं षड्व्याघता महत्वस्य ॥ ४ ॥

गंधः सुवर्णे फलमिक्षुदण्डे नाकारि पुष्पं खलु चन्दनेषु ।
विद्वान् धनाढ्यो नतु दीर्घजीवी धातुः पुरा कोपि न बुद्धिदोभूत् ॥५

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ॥ ६ ॥

दारेषु किंचित्स्वजनेषु किंचित् गोप्यं वयस्येषु सुतेषु किंचित् ।
युक्तं नवा युक्तमिदं विचिंत्य वदेद्विपश्चिन्महतोऽनुरोधात् ॥ ७ ॥

वैद्या वदन्ति कफपित्तमरुद्विकारान् ।
ज्योतिर्विदो ग्रहगतिं परिवर्तयन्ति ॥
भूताभिषंग इति भूतविदो वदन्ति ।
प्रारब्धकर्म बलवन्मुनयो वदन्ति ॥ ८ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनात् ।
विप्रोनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ॥
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात् ।
मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥ ९ ॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान् ।
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः ॥
अक्षैश्चापि युधिष्ठिरेण रमता प्राप्तो ह्यनर्थः कथं ।
प्रत्यासन्नविपत्तिमूढमनसांप्रायो मतिः क्षीयते ॥ १० ॥

## पाठः २४.

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ १ ॥

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तः तेन मुनिना काकेन नीयमानो मूषिकशावको दृष्टः, ततः स्वभाव दयात्मना तेन मुनिना, नीवारकणैः स संवर्धितः, कदाचिद्विडालस मूषिकं खादितुमुपधावति, तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश, ततो मुनिनोक्तं मूषिक त्वं मार्जारो भव, ततः स विडाल कुक्कुरं दृष्ट्वा पलायते, ततो मुनिनोक्तं कुक्कुराद्बिभेषि ? त्वमेव कुक्कुरो भव, सच कुक्कुरो व्याघ्राद्बिभेति, ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः, अथ तं व्याघ्रं मुनिर्मूषिकोऽयमिति पश्यति अथ तं मुनिं दृष्ट्वा व्याघ्रं च सर्वे वदन्ति, अनेन मुनिना मूषिको व्याघ्रतां नीतः, एतच्छ्रुत्वा स व्याघ्रोऽचिन्तयत्, यावदनेन मुनिना स्थातव्यं तावदिदं मे स्वरूपाख्यानं अकीर्तिकरं न पला-यिष्यते, इत्यालोच्य मूषिकस्तं मुनिं हन्तुं गतः, ततो मुनिना तत् ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः अतोहं ब्रवीमि "नीचः श्लाघ्यपदं इत्यादि."

---

## पाठः २५.

यथा धेनुसहस्रेषु वत्सो विन्दति मातरं ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ १ ॥
तादृशी जायते बुद्धिर्व्यवसायोऽपि तादृशः ।
सहायास्तादृशाश्चैव यादृशी भवितव्यता ॥ २ ॥
अवश्यंभाविभावानां प्रतीकारो भवेद्यदि ।
तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥ ३ ॥

प्रायः समापन्नविपत्तिकाले धियोपि पुंसां मलिना भवन्ति ४

वने जने शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुरा कृतानि॥५॥

सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा।
अहं करोमीति वृथाभिमानः स्वकर्मसूत्रग्रथितोहि लोकः ॥ ६ ॥

भीमं वनं भवति तस्य पुरं प्रधानं सर्वो जनः सुजनतामुपयाति तस्य।
कृत्स्नाच भूर्भवति सन्निधिरत्नपूर्णा यस्यास्तिपूर्वसुकृतं विपुलंजनस्य

नैवाकृतिः फलति, नैव कुलं, न शीलं ।
विद्यापि नैव, नच यत्नकृतापि सेवा ॥
भाग्यानि पूर्वतपसा खलु संचितानि ।
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ८ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं ।
नोलूकेन विलोक्यते यदि दिवा सूर्यस्य किं दूषणम् ॥
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम् ।
यद्धात्रा निजभालपट्टलिखितं तन्मार्जितुं कः क्षमः ॥ ९ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं ।
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ॥
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा माकृथाः ।
कूपे पश्य पयोनिधावपि घटो गृण्हाति तुल्यं जलम् ॥ १० ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा ।
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा ।
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ११ ॥

---

## पाठः २६.

गुणी च गुणरागी च विरलः सरलो जनः ॥ १ ॥
उदये सविता रक्तो रक्तश्चास्तमये तथा ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥ २ ॥
आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महारंम्भाः कृतधियः तिष्ठन्ति च निराकुलाः ॥ ३ ॥
इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत्सज्जनमैत्री विपरीतानां च विपरीता ॥ ४ ॥
वनेऽपि सिंहा मृगमांसभक्षिणो बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता न नीचकर्माणि समाचरन्ति ॥ ५ ॥
पिबन्ति नद्यः स्वयमेव नांभः स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥ ६ ॥
दाता न दापयति दापयिता न दत्ते ।
यो दानदापनपरो मधुरं न वक्ति ॥
दानं च दापनमथो मधुरा च वाणी ।
त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति ॥ ७ ॥
आरभ्यते न खलु विघ्नभयेन नीचैः ।
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ॥
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः ।
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥ ८ ॥

---

## पाठः २७.

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥ १ ॥

अस्ति गौतमस्यारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः, सच यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कंधे कृत्वा गच्छन् धूर्तत्रयेणावलो-

ातिप्रकर्षो भवतीति समालोच्य वृक्षत्रयतले क्रोशान्तरेण तस्य ाह्मणस्य आगमनं प्रतीक्षमाणाः पथि स्थिताः, तत्र एकेन धूर्तेन ाच्छन् स ब्राह्मणोऽभिहितः—भो ब्राह्मण किमिति कुक्कुरः कन्धेनोह्यते ? विप्रेणोक्तं नायं श्वा किन्तु यज्ञच्छागः, अथ अनन्तरस्थितेनान्येन धूर्तेन तथैवोक्तम्, तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः। यतः "मतिर्दोलायते सत्यं सतामपि खलोक्तिभिः" ततस्तवैथ तृतीयधूर्तवचनं श्रुत्वा स्वमतिभ्रमं निश्चित्य छागं त्यक्त्वा ब्राह्मणः स्नात्वा गृहं ययौ सच च्छागस्तैर्धूर्तैर्नीत्वा भक्षितः, अतोहं ब्रवीमि "आत्मौपम्येन यो वेत्ति इत्यादि"

---

## पाठः २८.

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भया।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥ १ ॥
अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ २ ॥
सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ३ ॥
राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः।
लोकास्तमनुवर्तंते यथा राजा तथा प्रजा ॥ ४ ॥
सुवर्णैः पट्टचैलैश्च शोभा स्याद्वारयोषिताम्।
पराक्रमेण दानेन राजन्ते राजनन्दनाः ॥ ५ ॥
यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते।
कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते तरवः कथम् ॥ ६ ॥
सर्वे यत्र विनेतारः सर्वे पण्डितमानिनः।

अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ८ ॥
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सुविद्यानां कः परः प्रियवादिनाम् ॥ ९ ॥
कृतार्थः स्वामिनं द्वेष्टि कृतदारस्तु मातरम् ।
जातापत्या पतिं द्वेष्टि गतरोगश्चिकित्सकम् ॥ १० ॥
जीवन्तोपि मृताः पंच व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ ११ ॥
आज्ञा कीर्तिः पालनं सज्जनानां दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः कोर्थस्तेषां पार्थिवोपाश्रयेण १२
ऋतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीष्वधनेषु बन्धुषु धनक्षयस्तेषु न गण्यते बुधैः १३
नरपतिहितकर्ता द्वेष्यतां याति लोके ।
जनपदहितकर्ता त्यज्यते पार्थिवेन ॥
इति महति विरोधे वर्तमानेऽसमाने ।
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥ १४ ॥

---

## पाठः २९.

अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसंगेन मुद्गरैरभिहन्यते ॥ १ ॥
यदि रामा यदि च रमा यदि तनयो विनयधीगुणोपेतः ।
तनये तनयोत्पत्तिः सुरवरनगरे किमाधिक्यम् ॥ २ ॥
उच्चैरध्ययनं पुरातनकथाः स्त्रीभिः सहालापनं ।
तासामर्भकलालनं पतिनुतिस्तत्पाकमिथ्यास्तुतिः ॥
आदेशस्य करावलंबनविधिः पांडित्यलेखक्रिया ।

व्यापारान्तरमुत्सृज्य वीक्षमाणो वधूमुखम्।
यो गृहेष्वेव निद्राति दरिद्राति स दुर्मतिः ॥ ४ ॥
सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरम् ।
आत्मानं किं न स द्वेष्टि सेव्यासेव्यं न वेत्ति यः ॥ ५ ॥
सेवा श्ववृत्तिर्यैरुक्ता न तैः सम्यगुदीरितम् ।
स्वच्छन्दचारी कुत्र श्वा विक्रीतासुः क्व सेवकः ॥ ६ ॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा ।
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः ॥
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ७ ॥
सीदन्ति सन्तो विलसन्त्यसन्तः पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु वैरं पश्यन्तु लोकाः कलिकौतुकानि ॥ ८ ॥

---

## पाठः ३०.

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
नहि वंध्या विजानाति गुर्वीं प्रसववेदनाम् ॥ १ ॥
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ २ ॥
इतरकर्मफलानि यदृच्छया विलिख, तानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख॥
यदा किंचिज्ज्ञोऽहं द्विपइव मदान्धः समभवं ।
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ॥
यदा किंचित् किंचित् बुधजनसकाशादवगतं ।
तदा मूर्खोऽस्मीति ज्वरइव मदो मे व्यपगतः ॥ ४ ॥
रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यंकशयनं ।
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ॥
क्वचित् कंथाधारी क्वचिदपिच दिव्यांवरधरो ।
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ६ ॥
अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ ७ ॥
वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात् ।
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते ॥
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते ।
यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ८ ॥
स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतस्तत्वविदां समाजे विभूषणं मौनमपंडितानाम्॥९॥
नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥ १० ॥
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
इति संचिन्त्य मतिमान् स्वस्थानं न परित्यजेत् ॥ ११ ॥

## पाठः ३१.

को देशः कानि मित्राणि कः कालः कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥ १ ॥
उद्घाटितनवद्वारे पंजरे विहगोऽनिलः ।
यत्तिष्ठति तदाश्चर्यं प्रयाणे विस्मयः कुतः ॥ २ ॥
प्रातर्मूत्रपुरीषाभ्यां मध्यान्हे क्षुत्पिपासया ।
तृप्ताः कामेन बाध्यंते प्राणिनो निशि निद्रया ॥ ३ ॥
नित्यमाचरतः शौचं कुर्वतः पितृतर्पणम् ।

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
समागमाः सापगमाः सर्वमुत्पादि भंगुरम् ॥ ५ ॥
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः ।
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ॥
जराजीर्णैरंगैर्नटइव वलीमण्डिततनु ।
र्नरः संसारांके विशति यमधानीजवनिकाम् ॥ ६ ॥
अवश्यं यातारश्चिरतरमुषित्वापि विषयाः ।
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥
व्रजन्तः स्वातंत्र्यादतुलपरितापाय मनसः ।
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ ७ ॥
आदित्यस्य गतागतैरहरहः संक्षीयते जीवितम् ।
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते ।
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ८ ॥
तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि ।
क्षुधार्तः सन् शालीन् कवलयति शाकाज्यवलितान् ॥
प्रदीप्ते कामाग्नौ सुदृढतरमाश्लिष्यति वधूं ।
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ॥ ९ ॥
यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा ।
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ॥
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् ।
संदीप्ते भवने हि कूपखननं प्रत्युद्यमः कीदृशः ॥ १० ॥
चेतोहरा युवतयः स्वमनोनुकूलाः ।
सद्बान्धवाः प्रणतिगर्भगिरश्च भृत्याः ॥
गर्जंति दन्तिनिवहास्तरलास्तुरंगाः ।

# पाठः ३२.

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं ।
व्यालानां पशवस्तृणांकुरभुजः सृष्टाः स्थलीशायिनः ॥
संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां ।
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ १

आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥ २ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतम् ।
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ॥
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते ।
जीवे वारितरंगबुद्बुदचले सौख्यं कुतः प्राणिनाम् ॥ ३ ॥

अशनं मे वसनं मे जाया मे बन्धुवर्गो मे ।
इति मे मे कुर्वाणं कालवृको हन्ति पुरुषाजम् ॥ ४ ॥

मान्धाता स महीपतिः क्षितितलेऽलंकारभूतो गतः ।
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ॥
अन्ये चापि युधिष्ठिरप्रभृतयो यावन्त एवाभवन् ।
नैकेनापि समं गता वसुमती मुंज त्वया यास्यति ॥ ५ ॥

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ६

अजानन् माहात्म्यं पततु शलभो दीपदहने ।
स मीनोप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ॥
विजानन्तोऽप्येते वयमिह विपज्जालजटिलान् ।
न मुंचामः कामानहह गहनो मोहमहिमा ॥ ७ ॥

मृत्योर्बिभेषि किं मूढ भीतं मुंचति किं यमः ।

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः ।
सोढा दुःसहशीतवाततपनाः क्लेशान्न तप्तं तपः ॥
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं ।
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचितम् ॥ ९ ॥
स्वमस्तकसमारूढं मृत्युं पश्येज्जनो यदि ।
आहारोऽपि न रोचेत किमुतान्या विभूतयः ॥ १० ॥
केचिद्वदन्ति धनहीनजनो जघन्यः ।
केचिद्वदन्ति गुणहीनजनो जघन्यः ॥
व्यासो वदत्यखिलवेदपुराणविज्ञो ।
नारायणस्मरणहीनजनो जघन्यः ॥ ११ ॥

---

तिष्ठार्जुनाद्य संग्रामे त्वां हनिष्याम्यहं शरैः ।
तिष्ठामि कर्ण किं मूढ मृगात्सिंहः पलायते ॥ १ ॥
दामोदरकराघातविह्वलीकृतचेतसा ।
दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् ॥ २ ॥
घृतं न श्रूयते कर्णे दधि स्वप्नेऽपि दुर्लभम् ।
मुग्धे दुग्धस्य का वार्ता तक्रं शक्रस्य दुर्लभम् ॥ ३ ॥
रामाभिषेके मदविह्वलाया हस्ताच्च्युतो हेमघटस्तरुण्याः ।
सोपानमार्गे प्रकरोति शब्दं ठठं ठठंठं ठठठं ठठंठः ॥ ४ ॥
अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥ ५ ॥
वृक्षाग्रवासी नच पक्षिराजस्त्रिनेत्रधारी नच शूलपाणिः ।
त्वग्वस्त्रधारी नच सिद्धयोगी जलं च बिभ्रन्न घटो न मेघः ६
वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च ।
[illegible] यो जानाति स पण्डितः ॥ ७ ॥

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा ।
गौरी स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी ॥
सा केनापि हृता तया विरहितो गन्तुं न शक्नोम्यहं ।
भिक्षो किं तव कामिनी नहि नहि प्राणप्रिया यष्टिका ॥८॥
केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः ।
रुदन्ति कौरवाः सर्वे हाहा केशव केशव ॥ ९ ॥
यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।
अहं कथं द्वितीया स्यात् द्वितीया स्यामहं कथम् ॥ १० ॥
एको ना विंशतिः स्त्रीणां स्नानार्थं शरयूं गता ।
विंशतिः पुनरायाता एको व्याघ्रेण भक्षितः ॥ ११ ॥
सुवर्णालंकृता कन्या हेमालंकारवर्जिता ।
सा कन्या विधवा जाता गृहे रोदिति तत्पतिः ॥ १२ ॥
अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥ १३ ॥
पंपासरसि रामेण सस्नेहं सविलासया ।
सीतया किं कृतं सार्धमत्रैवोत्तरमीक्ष्यताम् ॥ १४ ॥
अम्लानपंकजा माला कंठे रामस्य सीतया ।
मुधा बुधा भ्रमन्त्यत्र प्रत्यक्षेपि क्रियापदे ॥ १५ ॥
कंसं जघान कृष्णः काशीतलवाहिनी गंगा ।
केदारपोषणरताः कंबलवन्तं न बाधते शीतम् ॥ १६ ॥
किमिच्छति नरः काश्यां भूपानां को रणे हितः ।
को वन्द्यः सर्वदेवानां दीयतामेकमुत्तरम् ॥ १७ ॥
को निर्दग्धस्त्रिपुररिपुणा कश्च कर्णस्य हन्ता ।
नद्याः कूलं विघटयति कः कः परस्त्रीरतश्च ॥
कः संनद्धो भवति समरे भूषणं किं कुचानाम् ।
किं दुःसंगाद्भवति महतां मानपत्तापहारः ॥ १८ ॥

## अथ शिक्षाध्यायः ।

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति ॥ सत्यं वद ॥ धर्मं चर ॥ स्वाध्यायान्मा प्रमदः ॥ आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ॥ सत्यान्न प्रमदितव्यम् ॥ धर्मान्न प्रमदितव्यम् ॥ कुशलान्न प्रमदितव्यम् ॥ भूत्यै न प्रमदितव्यम् ॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥ देवपितृकार्याभ्यां न प्रमदितव्यम् ॥ मातृदेवो भव ॥ पितृदेवो भव ॥ आचार्यदेवो भव ॥ अतिथिदेवो भव ॥ यान्यनवद्यानि कर्माणि तानि सेवितव्यानि ॥ नो इतराणि ॥ यान्यस्माकꣳ सुचरितानि तानि त्वयोपास्यानि ॥ २ ॥ नो इतराणि ॥ ये केचास्मच्छ्रेयाꣳसो ब्राह्मणाः ॥ तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् ॥ श्रद्धया देयम् ॥ अश्रद्धया देयम् ॥ श्रिया देयम् ॥ ह्रिया देयम् ॥ भिया देयम् ॥ संविदा देयम् ॥ अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥ ये तत्र ब्राह्मणाः संमर्शिनः ॥ युक्ता आयुक्ताः ॥ अलूक्षा धर्मकामाः स्युः ॥ यथा ते तत्र वर्तेरन् ॥ तथा तत्र वर्तेथाः ॥ अथाभ्याख्यातेषु ॥ ये तत्र ब्राह्मणाः संमर्शिनः ॥ युक्ता आयुक्ताः ॥ अलूक्षा धर्मकामाः स्युः ॥ यथा ते तेषु वर्तेरन् ॥ तथा तेषु वर्तेथाः ॥ एष आदेशः ॥ एष उपदेशः ॥ एषा वेदोपनिषत् ॥ एतदनुशासनम् ॥ एवमुपासितव्यम् ॥ एवमु चैतदुपास्यम् ॥ ४ ॥

REFBK-0000457